1900

# आह्निकतरंगः

LIBRARY
OF THE
BOMBAY
BRANCH
OF THE
ROYAL ASIATIC SOCIETY

श्रीगणेशायनमः॥श्रीवेदव्यासायनमः॥ ॥अथसदाचारस्मृ
तिसारेएकआह्निकमुच्यते॥प्रत्यहंरात्रेःपश्चिमभागेषट्घटि
काकालात्मकेब्राह्मेमुहूर्तेउद्बुध्यनारायणादिनामस्मरणेन
त्वाशयनादुत्थायसम्यग्भूमिंप्रार्थयेत्॥तत्रमंत्रः॥समुद्रवसने
देवीपर्वतस्तनमंडिते॥विष्णुपत्निनमस्तुभ्यंपादस्पर्शंक्षमस्व
मेऽपि॥प्रातःकालात्मकंकर्मनित्यनैमित्तिकात्मकं॥ईश्वराराध
नार्थायकरिष्येहंतवाज्ञया॥१॥इतिविष्णुंसंप्रार्थ्य॥नमस्तुतालि









कादेववि॒ष्णुभक्तिपरायणाःधर्ममार्गेप्रेरयंतुभवंतःसर्वेएवहि
तिदेवाभ्यर्थयेत्॥ततःग्रामाद्दूरंगृहोवहिर्गत्वामूत्रपुरीषोत्स



र्जनंकुर्यात्॥तत्रायंप्रकारः॥ग्रामाद्बहिःनैर्ऋतिभागेपश्चिम
भागेवाशुद्धेमोकपालास्थिभस्मादिरहितायांतरणशुष्कपत्रै
भूमिमाछाद्ययज्ञोपवीतंकंठलंबितंपृष्ठतःकर्णेवाप्रस्थापय



लपूर्णपात्रंदूरतःस्थापयित्वावस्त्रेणशिरोघ्राणंनिर्जनेमौनेनऊ
र्ध्वाधोभागंतिर्यक्कचनावलोकयेत्मलमूत्रेविसर्जयेत्॥दिवा

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

चेदुत्तराभिमुखः रात्रौ तु दक्षिणाभिमुखः संध्याकाले पश्चिमाभि
मुखो शौचोदकपात्रं मूत्रपुरीषोत्सर्गकाले हस्तोध्नं चेत्तत्तत्रस्थो
दकं मूत्रसमाग्रही तोदकपात्रं श्वेकुर्यान्मूत्रपुरीषके तत्तोयंमू
त्रतुल्यं स्याद्द्विजश्चांद्रायणं चरेत्तद्वस्तुकैः यज्ञोपवीतंयद
कंठलंबितंन चेत्तदाऽपवित्रंपुनस्त्यक्त्वानूतनयज्ञोपवीतं
धार्यं तदापाणिश्शिरसिनस्थापनीयः देवालयेयज्ञस्थलेस्मश
नेअग्नेरुदकेचतटाकेसमुद्रनदीतीरेषुअश्वत्थादिद्रुमछाया



यांअग्निगोब्राह्मणसूर्यसोमउदकाभिमुखंचन्कुर्यात्स्वविष्टां
न पृच्छेत्तादृष्टाचेत्सूर्यगोब्राह्मणादिकं पत्रेत्तथाव्रीह्यादि
कंतुषागारमार्गसिक्यस्थानरवलोमरसकीटलतांघाछादितस्थ
लक्षेत्रेषुविण्मूत्रेनोत्सर्जयेत्स्नानंकृत्वाद्रवासस्तुविण्मूत्रेकु
र्वतेयदिप्राणायामत्रयेकृत्वापुनःस्नानेनशुध्यति इत्यत्रमुख्य
स्नानात्रोक्तस्यपुनःस्नानशब्देनमंत्रस्नानंग्राह्यंमंत्रस्नानविधि
श्चोत्तरत्रवक्ष्यते संस्पृष्टनासमवारंशुष्कस्त्वार्द्रःपठेद्वेत्

इतिहारीतस्मृतौ॥ स्नाटनाशौचेनहस्ताभ्यांसंचालनमुच्यते॥ ॥इ
तिमूत्रपुरीषोत्सर्जनेऽर्थशौचविधिः॥ ॥मल्लोष्टेनगुदंशोध्यग्र
हीतश्रिभश्चोत्थायजलपात्रस्थलंगत्वापात्रस्थोदकेनमृदाशौचंकु
र्यात्॥नतुनद्यादौ॥नदीसरस्तटाकेषुवापीकूपह्रदेषुच॥कुल्याया
वखातेषुद्विजःशौचंविवर्जयेत्॥इतिऋष्यशृंगोक्तेः॥अन्यैर्गारतुषकी
रास्थिशर्करारक्तकलान्वितांवल्मीकमूषकोत्खातांस्नानस्थोचमा
र्गगां॥अन्यशौचावशिष्टांचह्यादद्दीतनमृत्तिकां॥एकालिंगेकरेतिस्र



उभयोर्मृद्द्वयंस्मृतांपादयोरेकवारंतुमूत्रशौचमिदंस्मृतं॥गुदंसांड
चधावयेदितिवापाठः॥विण्मूत्रोत्सर्जनेचांघ्रिंदक्षिणंक्षालयेत्ततः
वामपादंतदन्यत्रवाममादौततोपरं॥अन्यत्रबहिरागमादिनिमि
त्तेपरंदक्षिणपादं॥अंगुष्ठपर्वमात्रंस्याल्लिंगशौचेतुमृत्तिके॥गु
दादिशौचसंख्यानियममाहायमः॥द्वेलिंगेमृत्तिकेद्वेयेगुदेपंचकरे
दृढ॥उभयोःसप्तदातव्यास्तिस्रस्तिस्रस्तुपादयोरिति॥मिहनेमृत्तमा
णमाह॥वसिष्ठः॥अर्धप्रस्तिमात्रेस्तुमृद्भिरशुद्धतैर्जलैः॥गंधलेप

क्षयकरंशौचंकुर्याद्यथाविधिः॥द्वितीयादिस्तदर्धार्धंज्ञेयाशौचेतुमन्ति
कंतिामच्छौचंतुगुल्फांतंअजानुःस्याज्जलेनतु मरात्वामणिबंधंस्याज्ज
लेनाकूपरंतथा॥मूत्रेतुद्विगुणाप्रोक्तारेतोस्वर्गेतुमन्निका॥गृहस्थ
नामिदंप्रोक्तंद्विगुणंब्रह्मचारिणां॥त्रिगुणंतुवनस्थस्ययतीनांतुचतु
र्गुणंरात्रावर्धंचरेच्छौचंआपद्यपितथैवच॥तदर्धमातुरेप्रोक्तंआतुरा
स्वार्धमध्वनिस्थितिःस्वग्रामेपूर्णमाचारःपरग्रामेतदर्धकः॥पट्टणेपर्वणि
चारःपथिसूत्रवदाचरेत्॥गंधक्षयकरःशौचःस्त्रीशूद्राणांविधिःस्म

राम
॥४॥

तः॥न्यूनाधिकंनकर्तव्यंशौचशुद्धिमभीप्सितैः॥प्रायश्चित्तेनशुद्धे
नविहितातिक्रमेसतीतिदक्षस्मृतिः॥ताम्रपात्रेविण्मूत्रादिसंबं
धेगंधक्षयपर्यंतंमृज्जलाभ्यांसंशोध्यआमंभस्मसंशोधयेत्॥मृद्भा
रुतुसाज्यमेव॥विप्रस्यभुंजतश्चेत्स्यात्रवणंमलमूत्रयोः॥भूमौनि
क्षिप्यतंग्रासंस्नात्वाविप्रोविशुध्यति॥भक्षयित्वातुतंग्रासमहोरा
त्रेणशुध्यति॥अश्नित्वासर्वमेवान्नंत्रिरात्रेणविशुध्यतीत्यांगिरस
स्मृतिः॥ ॥इतिशौचविधिः॥अथगंडूषविधिः॥ ॥चत्वारोष्टौचमा

दूषाः क्रमान्मूत्रपुरीषयोः शुध्यंतेद्वादशैवास्युरेतोत्सर्गेतुषोडश॥ब
हिरागमनादौच चत्वारः शुद्धिदाः स्मृताः॥ब्रह्मचार्यादिकानांतु मृत्ति
कास्त्रीचोक्तन्यायेनद्विगुणादिकं ज्ञेयं॥विधवानांतुयतिवद्दूषा॥
परिकीर्त्तिताः॥मेध्यामेध्येंद्रियाण्याहामनुः॥ऊर्ध्वनाभेरिंद्रियाणि
मेध्यान्युक्तानिसर्वशः॥तदधस्तात्त्वमेध्यानिकीर्त्तितानिनसंशयः॥
केशशुक्रमस्रक्कमज्जामूत्रविट्कर्णविण्नवान्॥श्लेष्माश्रुदूषिका
स्वेदान्यरस्ययदिसंस्पृशेत्॥प्रक्षाल्य मृज्जलाभ्यांतदंगंस्नात्वा

मेद्विजः॥तान्येवखानिसंस्पृश्यपूतःस्यात्परिमार्जनादिति॥शुक्रंरे
तः॥असृक्रक्तं॥मज्जाशरीरस्थधातुविशेषः॥विट्विष्टा॥कर्ण
विट्कर्णस्थमलं॥अश्रुनेत्रोदकं॥दूषिकानेत्रमलं॥ ॥इतिगंडूष
विधिः॥अथाचमनं॥ ॥शुचौदेशेउपविश्येवउदङ्मुखोयज्ञोपवीत्यात्मानंतर्हस्त
युग्मःसपवित्रः॥बध्वशिखःब्रह्मसूत्रवान्प्राङ्मुखोदङ्मुखो
वाजुद्धृदयेनरहितेनशुचिनशीतलेनद्विजःब्राह्मेणतीर्थेनआचा
मेत्॥मार्कंडेयः॥सपवित्रेणहस्तेनकुर्यादाचमनक्रियां॥नोच्छिष्टं

पवित्रंस्यात्मुक्तोच्छिष्टंतुवर्जयेत्॥पवित्रग्रंथिर्नीचामेनदुर्वीभि
र्कदाचनानकाशैर्नचशून्यःसन्कुर्यात्पाणिरपस्पृशेत्॥अंगुष्ठ
मूलंब्राह्मंस्यात्प्राजापत्यंकनिष्ठगंपित्र्यंतर्जनीमूलंकराग्रंदेव
तंस्मृतंआग्नेयंकरमध्यंस्यात्तीर्थान्येवद्विजस्यहि॥तर्पणंदेवत
दिभ्योदेवतीर्थादिभिःस्मृतं॥शून्यःपवित्ररहितश्॥आदिपादाभ्यां
ऋषितर्पणकनिष्ठामूलस्थप्राजापत्येनतीर्थेनपित्र्यतर्पणंतुत
र्जन्यंगुष्ठमध्यस्थपित्र्यतीर्थेनग्राह्यं॥भारद्वाजः॥पिबेदाचमनेक

अ०

रामः

॥६॥

रिविक्षितंब्रह्मतीर्थतः॥प्राजापत्येनहोतव्यपैत्रेणपित्र्यतर्पणं
कराग्रेणप्रदानंस्यामध्यमेनप्रतिग्रहइति॥व्याघ्रः॥गात्रस्थान
न्याचमनेस्पृष्ट्वास्पृष्ट्वाजलंस्पृशेदिति॥प्रत्येकमुदकंस्पृशेत्कुर्या
दाचमनेबुधइतिदक्षोक्तेः॥एकदेवउदकंगृहीत्वासर्वांगानामुद
कस्पर्शनंवाकार्यं॥व्यासः॥गोकर्णवत्तिहस्तेनमाषमग्नंजलंपिबे
त्॥तन्यूनमधिकंपीत्वासुरापानंभवेद्विजः॥गोकर्णप्रकारमाह॥
व्यासएवासंहितांगुलिनातोयंगृहीत्वापाणिनाद्विजः॥मुक्तांगुष्ठ

कनिष्टेनगोकर्णेनविदुर्बुधाइति॥संवृतःशिरःप्रावृत्यकंठंवाति
ष्टन्मुक्तशिखोवापिवा॥अकृत्वान्पादयोःशौचआचांतोप्यशुचिर्भ
वेदितिनातिष्ठन्निवस्यापवादः॥जानुमात्रजलेतिष्ठन्नासीनःप्राङ्
मुखस्थलेतर्पणंचमनंकुर्याज्जापंचापियथाविधिः॥तत्रविशेष
माहपैठीनसिः॥पादमेकंजलस्थंस्याद्द्वितीयंबहिरेवच॥कृत्वाचमे
द्विजश्चार्द्रवासाश्चाशुष्कवस्त्रकः॥आर्द्रवासाजलेकुर्यात्तर्पणंचमनं
जपं॥शुष्कवासास्थलेकुर्यात्तर्पणंचमनंजपमिति॥जानुमात्रेतदर्धं

अ०
॥७॥

राम

वाजलेतिष्ठन्नुपस्पृशेत्॥उपस्पृशेदाचमेदित्यर्थः॥अग्नितप्तंच
दुर्गंधंतथाबुद्बुदफेनयुक्तं॥एलादिवासितंक्षारंजलंशौचावशे
षितं॥छत्रंपर्युषितंस्पृष्टंसजेच्चक्रिमिसंयुतं॥देवाभिषिक्तशेष
चयजेदाचमनेजलं॥तिष्ठन्मेहश्वसंजल्पन्प्रलपन्दुर्जनभाष
णं॥अन्यस्पृष्टान्दिशंपश्यन्यत्रयत्नवुष्टपदार्थकं॥शयानःपाङ्
मुखस्थश्चबहिर्जानुकरोपिवा॥कंचुकयाछादितशिरासोपानु
टकानचाचमेत्॥एकहस्तेननाचामेन्मुक्तकेशोजलावृतः॥

सदायज्ञोपवीतीस्यात्तथाबद्धशिखःसदा॥तथीनोयज्ञद्विजःकु
र्यात्तत्सर्वंनिष्फलंभवेत्॥इतिस्मृत्वास्वोपविष्टस्थलेऽक्रिमिपिपी
लिकापीडाव्यावर्त्यर्थंस्वरितःस्थापितजलेनावृतः॥तथाचहारीत
पवित्रपाणिराचमेत्रक्तिस्थेनवारिणा॥त्रिःप्राश्यांगुष्ठमूले
नद्विरभ्यक्तपोलकौ॥मध्यमांगुलिभिःपश्चाद्विःशोषंसम्जेत्स
रा॥नासिकोष्यन्तरंप्रश्वासर्वांगुलिभिरेवच॥पादौहस्तौशिर
श्चैवजलेःसंमार्जयेत्ततः॥अंगुष्ठतर्जनीभ्यांचसंस्पृश्यनासिका

पुटौ॥अंगुष्ठानाभिकाभ्यांतुचक्षुःश्रोत्रेजलेःस्पृशेत्॥कनिष्ठक
गुष्ठकेनाभितलहृदयेततः॥सर्वांगुलिभिःशिरसिबाहुमूलेतथैव
चा॥मामभिःकेशवाद्यैश्चयथासंख्यमुपस्पृशेदिति॥पवित्रपा
णिः॥सुवर्णपवित्रपाणिर्वा॥तल्लक्षणं॥अनंतस्तरलेयोतुकु
शेप्रादेशसंमितो॥अनरवछेदितोसाग्रोतापवित्राभिधायको
कुशमध्यस्थगर्भपत्रंनिष्पिडयएतादृशंकुशपवित्रद्वयमेवपवि
त्रमित्यर्थः॥सुवर्णसुवर्णस्यसुवर्णस्यांगुलीयकं॥पवित्रमितिवि

स्य

ज्ञेयंसर्वकर्मसुपूजितमितिसुवर्णस्यशोभनवर्णस्यासुवर्णस्यपंच
गुंजात्मकेमाषःषोडशभिःपरिमितस्यसुवर्णस्याकांचनस्याऽगु
लीयकंमुद्रिकांपवित्रमित्यर्थः॥अन्यानितुपवित्राणिकुशदूर्वात्मका
न्यपि॥हेमात्मकपवित्रस्यकलानार्हंतिषोडशीं॥एकानामिकयोर्धार्य
दर्भस्तुद्विजसत्तमैः॥द्वाभ्यामनामिकाभ्यांवाधार्यैदर्भपवित्रके॥एवंहे
मपवित्रंचधार्यंविप्रादिभिर्बुधैरिति॥प्रक्षालितेनवारिणासमीचीं
नोदकेना॥तत्प्रकारमाह॥त्रिरितित्रिवारं॥अंगुष्ठेनमूलेनआलेपनं



र्थेनउदकमितित्रेषः॥त्रिभिःकेशवादिनामभिःप्राश्यपीत्वागोविंद
विष्णुनाम्नाभ्यांकरौप्रक्षालयेदितित्रेषः॥कपोलकोगंडस्थलद्व
यं॥अंगुष्ठमूलभागेनमधुसूदनत्रिविक्रमद्वयेनद्विः॥द्विवारंउन्म
ज्यात्प्रक्षालयात्॥ओष्ठौ॥ओष्ठद्वयं॥वामनेनाम्ना॥मध्यमांगुलिभिःम
ध्यमांगुलित्रयेणतथानासिकोर्ध्वमध्यमभागंसर्वांगुलिभिः॥श्री
धरेतिनाम्नासम्मृजेदितिसंचयः॥ततःहृषीकेशनाम्नाहस्तौ॥पद्मना
भेतिनाम्नापादौ॥दामोदरेतिनाम्नाशिरःसंमार्जयेत्॥संकर्षणे

तिनाम्नानासिकाधोभागंमुष्टिपृष्ठभागेनसमर्जेदितिक्षेयंानासि
कापुटोनासिकादक्षिणवामभागोऽंगुष्टतर्जनीभ्यांस्फूलांगुलि
तत्समीपस्थांगुलिभ्यांवासुदेवप्रद्युम्नेतिनामाभ्यांचक्षुर्द्वयंाअंगु
ष्ठानामिकाभ्यांअनिरुद्धपुरुषोत्तमनामाभ्यांकर्णद्वयंाएताभ्यामेव
गुलिभ्यांअधोक्षजनामाभ्यांजलैःस्पर्शेत्ाअनामिकातुकनिष्ठांगु
लिसमीपस्थांगुलिःानाभिंअच्युतेतिनाम्नाकनिष्ठेबाहुवचनेन
अनामिकांचस्पृशेतोहृदयतलेनकरतलेनजनार्दननाम्नातततः स



२ नारसिंहेति

र्वांगुलिभिःशिरसिाउपेंद्रनाम्नातथाबाहुमूलेबाहूर्ध्वभागद्वयं
हरिःकक्षेतिनामाभ्यांसर्वांगुलिभिःस्पर्शेदितिवाक्याभिप्रायःाज
पेस्नानगमनेपरिधानेचवाससःास्नानेपानेक्षुतंस्वापेहोमभोज
नकर्मसुरथोपसर्पणेमूत्रविष्मास्पृष्ट्वेद्विराचमेत्ाइतिभारद्वा
जस्मृतिःास्मृतिरत्ोादानेप्रतिग्रहेहोमेजपेसंध्यात्रयेतथाावि
कर्मणिचाचामेदादौद्विःसकृदंचतइतिाचंडालादीन्जपेहोमेच
ष्टाचामेत्सकृत्स्वकृत्ाक्षुतेनिष्ठीवनेचैवदंतोच्छिष्टतथाऽतोापति

छ० ॥११॥ निःसंहसंवादे दक्षिणंश्रवणंस्पृशेत्इति॥निष्ठीवनाअधोपुविसर्गः॥ ७०
पराशरः॥पुष्कराद्यानितीर्थानिगंगाद्यासरितस्तथा॥विप्रस्यदक्षिणेक
र्णेसंतीतिमनुरब्रवीत्॥पंचांगुलीमेलयित्वादक्षिणंश्रवणंस्पृशेत्॥गो
र्णमाचमनंप्रोक्तंदर्भावेसलिलस्यचेति॥देवलः॥भोजनेदंतलग्नानिनिर्ह
र्याचमनंचरेत्॥दंतलग्नमनिर्हृत्यंतरालेनयदिदंतवत्॥इतितत्रैनय रात्र
दिअनिर्हृत्यंनिष्क्रमितुमशक्यंतर्हिदंतलग्नमभादिकंदंतवन्नोच्छिष्टं॥ ॥९१॥
एवंहस्तमुखलग्नघृतादिकंमदादिशोधनेननगतंनोच्छिष्टमितिभाव

नि ॥स्नातःपादंतलग्नेफलेचैवसुरालेहानुलेपनेतांबूलभक्षणेचैवनो
च्छिष्टंभवेद्द्विजः॥इक्षुदंडेतिलेसोमेनोच्छिष्टंमनुरब्रवीत्॥यमः॥प्रसृज्यमुख
श्चेदाचामेत्सुनराचम्यशुध्यति॥यामेप्रसृज्यश्चेदाचामेत्सुनस्नानेनशुध्यति
आरण्येनुदकेदेशेचोरव्याघ्रभयाकुलेकृत्वामूत्रपुरीषंवाद्रव्यहस्तोन
दुष्यतीति॥याक्रियाःकुरुतेमोहादनाचम्यैवनास्तिकः॥भवंतितस्य
ताःसर्वानिष्फलाहिनसंशयः॥श्रोतस्मार्तेषुगार्हेषुक्रियमाणेषु
वेबुधः॥द्विराचमेत्तुसर्वत्रविण्मूत्रोत्सर्जनेत्रयमिति॥तथोक्तंगंडू

नानंतरमितिशेषः॥आपत्कालेतुसंप्राप्तेशौचाचारंनचिंतयेत्॥शौचं
समाचरेत्सश्वादितिवेदविदोविदुरिति॥ ॥इत्याचमनप्रकरणं॥
अथदंतधावनं॥ ॥व्यासः॥प्रक्षाल्यपादौहस्तौचमुखंचाद्भिःस
माहितः॥दक्षिणंबाहुमुद्धृत्यसव्यजान्वंतरंततः॥आचम्यप्राङ्मुखः
पश्चाद्दंतधावनमाचरेत्॥प्रतिपत्सर्वषष्ठीषुनवम्यांद्वादशीदिने॥
अष्टम्यांचचतुर्दश्यांसंक्रांत्यांचत्रिजन्मसु॥उपवासदिनेपातेवैधतै
चापराण्हके॥नद्यांदेवालयेगोष्ठेजलमध्येशुचिस्थले॥दक्षिणाभि

मुखस्तिष्ठन्प्राङ्मुखश्चविदिङ्मुखः॥गच्छन्नसन्मुखः काष्ठैःनकुर्यादंतध
वनं॥व्याघ्रदक्षाजिनेविप्राःकुशयज्ञतलेषुच॥उपविश्यनकुर्वीतदं
तशुद्धिमनातुरः॥शुक्लपक्षेरविभौमगुरुवारेषुकुजाहेव्रतवासरे॥जन्मभेश्राद्ध
दिवसेदंतकाष्ठंविवर्जयेत्॥जान्वंतर्गतहस्तःसन्कुक्कुटासनसंस्थितः
तर्पणाचमनोल्लेखदंतधावनमाचरेत्॥वर्जयेच्चतमार्द्रंशुष्कंच
पाटितंतथा॥क्रांतिसंग्रंथिसंयुक्तंतथाश्वत्थपलाशकं॥कार्पासश्वकु
शश्चैववनिर्गुंडीअर्कतालकान्॥अंगारवालुकावस्त्रभस्मलोष्टकास

कानि॥वर्जयेद्दंतशुद्धौतुनरवेरंगुलिकेस्तथा॥मुक्त्वाचानामिकांगुष्ठौवर्जये
दंतधावने॥यस्तुगंडूषसमयेतर्जन्यादंतधावनं॥करोतियदिमूढात्मा
नरकेपततिद्विजः॥इतिव्यासस्मृतिः॥आस्फोटापामार्गविल्वनांतिन्त्री
णिकरवीरयोः॥वटार्कधात्रीजंबीरक्षीरकंटिकिनामपि॥निंबस्यकु
टजस्यापिकाष्ठेनरदशोधनं॥पलाशमध्यकांडेनयावनालशरंवि
ना॥तर्जन्यप्रत्यैःसदाकुर्यादमावसेकादशींविना॥तिथिस्तात्कालिकीग्रा
ह्यास्नानेवेदंतधावनेइतिअंगिरस्मृतिः॥गर्गस्तुदंतकाष्ठानांफल

माह॥लक्ष्मीश्चैवार्थसंपत्तिर्वदर्यामधुरस्वरः॥वाटवीनिर्धनंबिल्वआम्र
दारोग्यमेवच॥औदुंबरादाक्यसिद्धिरपामार्गोधृतिस्तुधीः॥प्रजाशमि
पुष्टताचसौभाग्यंचोपजायते॥अर्कस्तुरोगहीनःस्यादंतैर्दुस्वप्ननाशन
मिति॥दंतकाष्ठप्रमाणंतुविप्राणांद्वादशांगुलं॥क्षत्रविट्शूद्रजातीनां
नवषड्वतुरंगुलं॥चतुरंगुलमानंतुस्त्रीणांनास्त्रत्रसंशयः॥दंतकाष्ठ
मिमंत्रमाह॥आयुर्बलंयशोवर्चःप्रजापशुवसूनिच॥ब्रह्मप्रज्ञांचमे
धांचत्वन्नोदेहिवनस्पते॥विनामिमंत्रेणविप्रोनकुर्याद्दंतधावनं॥

ऋषिःप्रजापतिस्वस्यछंदोनुष्टुप्बृहस्पतिर्देवतेतिन्यसेत्ततोदंतधाव
नमाचरेत्॥प्रक्षाल्यदंतकाष्ठंतुशुचौदेशेततस्त्यजेत्॥विधवाबटुका॥
स्यानांनकाष्ठेदंतधावनमितिभारद्वाजः॥ ॥इतिदंतधावनं॥ ॥
अथप्रातःस्मरणं॥ ॥ततःस्त्रिराचम्यउषःकालेगजेंद्रमोक्षणादिस्तो
त्रंपठेत्॥ततःकिंचित्सुरमेश्वरध्यानंकुर्यात्॥ब्राह्मेमुहूर्तेचोत्था
यवार्युपस्पृश्यमाधवंहृद्ध्योप्रसन्नेकरणआत्मानंतमसःपरमिति
नागवतेवत्सस्यप्रातःकालाचरणोक्तेः॥एवमेव॥श्रीमदाचार्यो



पिस्मृत्वाविष्णुंसमुत्थायेतिसंशब्दबलात्शयनादुत्थायेतिग्राह्यं॥
यथाविधीत्यस्यपूर्वोत्तरत्रचशब्दसंबंधः॥उद्बुध्यनारायणेत्यादि
नामस्मरणंकृत्वाशयनादुत्थाययथाविधिशौचंकृत्वाआचम्ययथा
विधिदंतधावनंकृत्वापश्चात्समभ्यक्तोराभ्यस्मृत्वोत्तस्यात्रानुवृ
त्तेःतस्यस्तोत्रपाठध्यानार्थकत्वात्स्नानात्पूर्वंतत्कुर्यादित्यर्थः॥ ॥
इतिप्रातःस्मरणं॥अथस्नानविधिः॥ ॥स्मृत्वोंकारंतुगायत्रीव
क्ष्यमाणंत्रिरन्वाद्विजः॥पुनराचम्यहृदयंवामस्कंधोचसंस्पृशेत्॥

स्नानार्थं द्विजआदायतुलसीमूलमृत्तिकां॥शुद्धांवामृदमादायप्रग
च्छेज्जलसंनिधिं॥आचम्यकृतसंकल्पःप्रार्थयेन्मंत्रकेनदी॥तथा॥गं
ङेषपदविक्षेपक्षालनंमलिनस्यच॥उक्षेपक्षेपणेदेविमृत्तुतंक्षमु
पोहिमां॥इत्युक्त्वाविस्रवादिभ्योअर्घंदत्वामलापकर्षस्नानंकुर्या
त्॥शुचिज्ञानुनिवस्थाप्यत्रिभागंकरयेन्मृदां॥मूलमंत्रेणसंप्रोक्ष्यगा
यत्र्याचास्त्रमंत्रयेत्॥अंशमेकंत्रिधाकृत्वाएकांशेनकपोलकौ॥गंडे
कक्षेतृतीयेचसवींगंतृतीयतः॥संमार्जयेद्वितीयंचत्रिधाकृत्वा

तथैकतः॥सर्वांगमार्जयेद्दृष्ट्वाद्वितीयेनकपोलकौ॥तृतीयेनशिरःपा
दौवक्षासंमार्जयेत्ततः॥तृतीयांशंगृहीत्वातुसलिलेस्नानमाचरे
त्॥जलेतेजोमयींमूर्त्तिंतस्यांप्राणंद्रवात्मकांद्रवरूपंतत्रविष्णुधा
येद्दंडादितस्यदोषांश्चैनपाणिनानैवहृभिहन्याज्जलंद्विजः॥इति
द्वादशाक्षरमंत्रंचतथैवाष्टाक्षरंमनुः॥विष्णुमंत्रंसमुच्चार्यत्रिव
रंतुनिमज्जयेत्॥आपोहिष्ठेतिसूक्तेनप्रोक्षयित्वाततोमृदांकुर्या
क्षिद्विस्थापयित्वेवत्रिधाकृत्वोतथैकतः॥पुंड्राणितुद्वितीयेनक

क्षयोसुतत्तीर्थतः॥त्रिर्निमज्जाघमर्षणंसूक्तंत्रिवारंतुजपेन्निमज्जेवहरिं
स्मरन्नास्तरंसर्वलोकानांजलेवैश्रेष्ठ्यायिनांप्रणवेनसदोत्थायदे
वर्षिपितृपूर्वकान्न्यायमुद्धरंचसंस्मरन्स्नात्वापुरुषसूक्ततः॥सिंचयेच्छ
रमुद्रेणस्वदेहस्थंहरिंस्मरन्॥वासुदेवांकितंबिंबंप्रवाहापिमुखोज
लैः॥नद्यांस्नायात्तटाकेतुसूर्यस्याभिमुखोदिवा॥प्राङ्मुखोदङ्मुखोरा
त्रौतत्तत्तीरंगतेद्विजः॥शिरस्याधायनिर्माल्यंसालिग्रामजलेनतुप्रो
क्षयित्वोत्तत्रिःपीत्वातीर्थंशिरसिधारयेत्॥तीर्थमाहात्म्यप्रतिपादका

इयंस्तुतिः॥तदस्यप्रियमभिपाथोऽस्यांनरोयत्रदेवयवोमदंति॥उरु
क्रमस्यसहिबंधुरित्थाविष्णोःपदेपरमेमध्वउत्सः॥अस्यार्थः॥अस्यउ
रुक्रमस्य॥उरुउत्कृष्टःक्रमःपदविक्षेपः॥त्रिविक्रमरूपोयस्यतादृश
स्यविष्णोःपदेस्थानेपरमेउत्तमेसालग्रामचक्रांकितादिरूपे॥अ
भि॥अभिषिक्तेउपसर्गएवंक्रियायाःसंनिधानेकर्तृकर्मादिसाध
नसहितक्रियावाचित्वात्॥उत्सःभागीरथीगोदावर्यादिप्रस्रवणरू
पः॥उत्सःप्रस्रवणंवारीयमरः॥अस्यविष्णोःप्रियोत्तसाधः॥तत्तदेवा

दिपदप्रापकत्वेनप्रसिद्धं॥पाथःउदकं॥कंबंधमुदकंपथइयमरः॥अ
इमस्यांपिबेयंऽमुभोजनइतिधातोः॥आशीर्लिङि॥उत्तमपुरुषैकव
चनेयंसुडागमेमियः॥आमादस्येऽस्यांमितिरूपं॥अत्रकर्तामंत्रदृष्ट
यत्रतीर्थपाथसःपानेदेवयवःदेवत्वमिछवःदेवश्राद्धाक्त्यंजंतात्
ङियाछंसीयुप्रसयः॥नरःपुरुषाःहर्षंप्राप्नुवंति॥महिहर्षइतिधा
तोःसःतीर्थपानकर्ताऽस्यविष्णोःबंधुःप्रमादस्यदःहिश्रुत्यादिप्र
सिद्धः॥मध्वःमुख्यप्राणावतारःश्रीमध्वाचार्यः॥इत्थंरथमेवअभि



षेकादिकंकृत्वातीर्थपानंकृत्वाश्रीविष्णुबंधुर्जीतइत्यर्थः॥केचित्तुअ
भ्यस्यामिसन्वत्सयंकुर्वंति॥तदयुक्तं॥तत्सक्षेऽपिश्राद्धस्यवेत्यथौ
पत्तेश्चव्यवहितान्वयप्रसंगाच्चेति॥ततोब्रह्मादिकान्देवान्कृत्वेष्ट्वे
पायनादिकान्॥ऋषीन्पितॄन्देवमुख्यान्तर्पयित्वाजलेनतुवा
क्षिणांसेशिरोबंधत्वातज्जलंभुविनिक्षिपेत्॥वस्त्रद्वितीयंनिष्पीड्य
सप्तवाताहतंकृत्वा॥स्थापयित्वातुशिरसिद्वादशाक्षरमंत्रतः॥प्रोक्ष
येदुपविश्यैवसर्वांगंश्रोधयेत्ततः॥उत्तरीयंसदाधार्यंतद्विनाना

चरेत्क्रियाः॥यज्ञोपवीतेद्वेधार्ये स्मार्ते श्रौते चकर्मणि॥तृतीयमुत्तरी
यार्थेवस्त्राभावेतदिष्यते॥ज्येष्ठभ्रातृमतानेवधार्ये पितृमतस्तु
था॥नोभाभ्यांपादुकेधार्ये तर्जन्यांरौप्यमुद्रिका॥धारणे॥स्नानत
वस्त्रायज्ञोपवीतेएनोत्तरीयेएवाशिरः॥मार्जयेदंगजातंचेत्स्नानश
ब्दानपाणिना॥नचनिर्धूतियात्केशान्नतिष्ठन्परिमार्जयेत्॥मार्ज
येद्भिन्नवस्त्रेणनान्यथामार्जयेत्क्वचित्॥चंद्रिका॥नोत्तरीयमध
कुर्यान्नोपर्यासंधस्तमंबरं॥अधोवस्त्रंचोत्तरीयंविपरीतंनकारये



त्॥अस्नात्वातुद्विजश्रेष्ठोनैववस्त्रंप्रसारयेत्॥उत्तरीयवस्त्रंधृत्वे
त्॥अधोनकार्यंशिरसःउपरिभागेननिष्कास्यपीडनीयं॥नतुपादभा
गेन॥अधोवस्त्रंपरिधानीयवस्त्रं॥अधोभागेननिष्कास्यपीडनी
यंनतु॥ऊर्ध्वभागेनेत्यर्थः॥स्नात्वैववाससीधौतेहृच्छिन्नेविभवेसति
देवस्येतिसंप्रोक्ष्यव्याहृत्यादायवस्त्रंकंउदुसंजातवेदसमित्यादि
संप्रदर्शयेत्॥आवहंतीतिप्रावृत्यपरिधानंततःपरंपूर्वकल्पमध्
त्वैवएष्टकल्पेनधारयेत्॥इदंजीवेसितृकविषयंऽजीवेसितृकेए

तुतर्पणंतेवस्त्रनिष्पीडनंकार्यमितिचवक्ष्यते॥चतुर्णांस्नानवस्त्रंव
स्त्रानिष्पीडयेद्भूमौवामप्रकोष्ठेनिक्षिप्यद्विराचम्यविशुध्यति॥नि
ष्पीडयस्नानवस्त्रंतुसंध्याकर्मनचाचरेत्॥वस्त्रनिष्पीडनात्तोयंपि
तृतर्पिकरंस्थलेजलस्नानेत्वृक्संस्यमंत्रस्नानंविधीयते॥आपोहि
ष्ठेत्यादिऋग्भिःतिसृभिस्तुद्यनुक्रमात्॥पुछःपादशिरोहस्तुशिरोह
स्तुचाधतःपादहस्तादूर्ध्वमस्तकेऋक्राप्रसर्चीमार्जयेदधः॥मस्तकेमार्ज
नंयत्स्यापादप्रभृत्येवसंयुतेः॥तारेणपादनंगामंत्रःस्तस्यारसस्तुयत

मंत्रस्नानंहिहितस्तोत्रंविद्धद्भिरितिनिश्चितमिति॥उत्तरायणमध्येतु
यदावर्षतिवासवः॥आतपेनसहस्नानंदिव्यस्नानंतदुच्यते॥तत्र
स्नातस्तुगंगायांस्नातोभवतिमानवः॥स्नातुमायांतिपितरदेवऋ
षयस्त्रिहेतिदिव्यस्नानं॥ ॥अथध्यानस्नानं॥ ॥ध्यायेत्स्यामिद्व
भ्यामपिपरंचयेत्॥खस्थितंपुंडरीकाक्षमंत्रमूर्तिंहरिंस्मरन्॥
स्मनंतादित्यसंकाशंमुकुटंवनमालिनं॥तत्सोदकज्झोधारानिपतंति
स्वमूर्धनि॥॥चिंतयेद्बुलरंध्रैःप्रविशंतींसकांनतुं॥तयासंप्लावयेत्सर्व

छं० ॥२०॥

मतर्देहगतमलोत्तरएणाद्विजरोमंत्रीजायतेस्फटिकोपमः॥योंगय
ज्ञवल्क्येतुप्रकारांतरेणोक्तंस्थितंसर्वभूतानांरविमंडलसंस्थितं॥नि
लजीमूतसंकाशंवासुदेवंचतुर्भुजं॥स्वदेहेचिंतयेद्देवंनियंत
नोक्तं॥हितत्त्वं॥अशक्तत्वेतुस्मृतिः॥आपःस्वभावतोमेध्याः किंपुनर्वि
संयुताः॥ताभिःस्नायादातुरस्तुतप्तंतूष्णवारिणेति॥तद्विधिस्तु
पात्रेशीतोदकंपूर्वंस्थापयमुष्णोदकंततःस्थापयित्वापुनःशीतम्
दकंमूलमंत्रिकां॥कुशंचस्थापयेत्तत्रपूर्ववद्देवताःस्मरेत्॥ततः

अ० ॥२०॥

स्नात्वाध्यानमंत्रंस्नानंविधिवदाचरेत्॥अशिरस्कंभवेत्स्नानंस्नान
शक्तोतुकर्मिणां॥आर्द्रेणवाससावापिदेहसंमार्जनंविदुः॥इति॥शुष्क
वातनरवाग्यंबुस्नानवस्त्रजलैस्तथा॥दीपवद्वनरछाप्यामार्जनं
लुरेवचादिवाविभिन्निकाछायारात्रावश्वस्यसंभवाकेशलुंमर्द
मरजोहंतिपुण्यंपुरातनमिति॥पारकयेकूपवाप्यादोमसिंडानत्रीन्
समुद्धरेत्॥पश्चात्स्नायादन्यथातुनस्नानंस्फलमाप्नुयात्॥नित्यंने
मित्तिकंस्नानंक्रियांगस्नानमेवचा॥तीर्थाभावेकर्त्तव्यमुष्णोदक

नरोदके॥ सिंहकर्कटयोर्मध्येसर्वानघोरजस्वलाः॥ आसुस्नानंनकु
र्वीतवर्जयित्वासमुद्रगाः॥ देवलः॥ तपनस्यसुतागंगागोमतीगोतमी
तथाऽरजस्नानप्रदुष्यंतियेचान्येपुंनदाःस्मृताः॥ पुंनदाःशोणभद्रा
दयः॥ उपाकर्मणिचोत्सर्गेप्रातःस्नानेतथैवच॥ चंद्रसूर्यग्रहेचैव
रजोदोषोनविद्यते॥ अभावेकूपवाप्यादेर्नित्यपूर्णेजलस्यतु॥ रजो
दुष्टेपिनद्योस्नानंकुर्याद्विधानतोऽर्तिता॥ विनोदर्भैर्नयत्स्नानं
यच्चदानंविनोदकं॥ असंख्यातंतुयज्ञंतंतसर्वंनिष्फलंभवेदिति॥



अष्टहस्तंनवश्वेतसदर्भैर्नान्यधारितं॥ उत्तरंदक्षिणंकृत्वंतंसुरा
ष्टवयोजयेत्॥ सम्यग्धृतंनवंश्वेतंसदर्भैश्चाष्टहस्तकं॥ अहतंतद्विजा
नीयात्सर्वकर्मसुपावनमितिच॥ नग्नश्चहतवस्त्रश्चविकश्चःकछयेव
च॥ श्रोतंस्मार्तंद्विजःकर्मकुर्याच्चेन्निष्फलंभवेत्॥ मलवस्त्रोदग्धव
स्त्रःछिन्नवस्त्रोर्ध्ववस्त्रकः॥ एकवासाअवासाश्चनग्नएवभवेन्नरः
॥ यज्ञोपवीतंवस्त्रार्थेधारयेद्द्विजोत्तमः॥ ॥इतिस्नानविधिः॥
अथोर्ध्वपुंड्रधारणं॥ ॥पाद्मे॥ श्रीरंगेद्वारकायांचश्रीकूर्मेच

तथास्थितोऽसिद्धाद्वैचप्रयागेचवाराहेतुलशीवनेऽथवाऽन्तिकांभ
क्त्वासालग्रामजलैःसहाऽगायत्रीमूलमंत्राभ्यांत्रिवारमभिमंत्र्यच॥
ततोर्ध्वपुंड्रंधृत्वांगेविष्णुंसायुज्यमाप्नुयात्॥यस्योदानंतपोहोमःश्रा
द्धंस्वाध्यायतर्पणंभस्मीभवतितस्सर्वंऊर्ध्वपुंड्रंविनाकृतमिति॥
स्नात्वापुंड्रंसदाकुर्यात्हुत्वाचैवतुभस्मनाऽदत्वानभ्यर्चगंधेनस्नान
कालेजलेनतुल्यंतत्प्रकारश्चतत्रैव॥नासादिकेशपर्यंतोदंडाकारः
सुशोभनः॥मध्येछिद्रान्वितःपुंड्रोहरिमंदिरसंज्ञितः॥विप्रैस्तुसतत





धार्यस्त्रीभिश्शुभदर्शिभिः॥सुवासिन्योपिविप्रेयुःतिलकोपरिकुंकु
मं॥अंगुष्ठतर्जनीभ्यांतुमुष्टिमोक्षायपुंड्रकंमध्यमानामिकाभ्यांच
आयुष्यार्थंसदैधृवं॥पुंड्राणांप्रमाणंतुब्रह्मांडे॥चतुरंगुलदीर्घस्या
त्ललाटेतूर्ध्वपुंड्रकः॥दशांगमूलंसुदरस्याद्दक्षःसप्तांगुलःस्मृतः॥
चतुरंगुलःकंठदेशेपार्श्वयोस्तुदशांगुलः॥अष्टांगुलस्तुबाहोःस्यात्
अंशयोश्चतुरंगुलः॥ऊर्ध्वाधोभागयोरष्टौमूर्ध्निसंषंगुलस्मृतः॥व
क्षस्तनोर्ध्वभागस्याश्रीवत्संतुषडंगुलं॥क्रमस्तुललाटोदरवक्षः

सुकंठेपार्श्वेचदक्षिणे॥दक्षेभुजेचांसेभागेवामेपार्श्वेसकेभुजे॥एष्वधो
भागऊर्ध्वेचकेशवादीनिविन्यसेत्॥चतुर्थ्यैतैःनमोंतैश्चक्रमाद्धृदयना
भिः॥एवंऋषिर्वासुदेवंश्रीवत्संदक्षिणेस्तनेदंडाकारंललाटेचपद्म
कारंतुवक्षसि॥वेणुपत्राकृतीबाह्वोरन्यादीपाकृतीभवेत्॥इतिऊ
र्ध्वपुंड्रप्रकरणं॥अथमुद्राधारणं॥ ॥ऊर्ध्वपुंड्रोपरिमुद्राधारणमाग्ने
येः॥चक्रशंखगदादीनिगोपीचंदनमुद्रया॥विष्ण्वायुधानिबिभृ
याज्ञानेमुक्तिप्रदानिवै॥चक्रमेकंन्यसेद्दंडेदक्षिणेचद्विजोत्तमः॥शंख

मेकंवामगंडेललाटेधारयेद्बुधः॥चक्रद्वयंदक्षकुक्षौवामेशंखद्वयंत
था॥दक्षबाह्वोर्ध्वभागेतुन्यसेच्चक्रद्वयंबुधः॥तदधःशंखमेकंचमध्ये
पद्मद्वयंतथा॥वामबाहूर्ध्वभागेतुन्यसेच्छंखद्वयद्विजः॥तदधःचक्रमे
कंतुमध्येचैवगदाद्वयं॥एकैकस्मिन्भुजेन्यसेत्नाममुद्राचतुष्टयं॥
अन्योर्ध्वपुंड्रेषुचतथाचक्रशंखादिविन्यसेत्॥सर्वत्रनाममुद्रास्या
दितिकेचनसंश्रयः॥चक्रद्वयंदक्षकुक्षौपद्ममेकंन्यसेत्स्तनौ॥वामेच
शंखद्वितयंगदामेकांचएवतः॥अधोर्ध्वभागद्वितयेएकमेकंसुद

र्शनाच्चक्रादिमंत्रस्तुतासदुर्शनमहाज्वालकोटिसूर्यसमप्रभ॥ओम्न
मोधस्यमनिसंविष्णोमार्गप्रदर्शयेत॥१॥पंचजान्यनिजध्वानध्वस्त
मातकसंचय॥पाहिमांपिनंघोरैरंसंसारार्णवपातिनं॥२॥ब्रह्मांड
भुवनारंभमूलस्तंभोगदाधरः॥कौमोदकीकरेयस्यतं॥ ॥गदाध
रा॥३॥संसारभेयभीतानांयोगिनामभयप्रदा॥पद्महस्तेनयोदेवः
योगीशंतंनमाम्यहं॥४॥नारायणनमस्तेस्तुनाममुद्रांकितंनरं॥द
ष्टेवलभतेमुक्तिंचंडालोब्रह्मघातकः॥५॥यज्ञोपवीतवद्धार्यचक्र

रामायण
॥२४॥

संवादयोद्विजैः॥संतप्तास्त्वग्निनाचैवब्रांह्मणेनविशेषतः॥प्रक्षा
ल्यायुधतोयेनशिरोमूलेनमार्जयेत॥नमोमुद्राभयंसक्तनखंविस्ता
पयेच्चतः॥प्रतिष्ठातामिमुद्राभिधारणंपरिकीर्तितं॥प्राप्यप्रति
ष्ठामंत्रंवान्यसेज्ज्ञात्वातुधारयेत॥नान्यथातुफलावाप्तिःकृतंकर्मव
थाभवेदिति॥ ॥इतिमुद्राधारणं॥अथश्रीतुलसीमालाधारणंउ
क्तं॥ ॥स्कांदेतुलसीकाष्ठजांधात्रीफलपद्माक्षसंभवां॥मालांतुप
वित्रेणक्षालयेन्मंत्रयेत्सुनः॥मूलमंत्रेणगायत्र्यादेवायविनिवेद्य

चाधूपंदीपंचनैवेद्यंदत्वामंत्रेणपूजयेत्॥सद्योजातंप्रपद्यामिसद्यो
जातायवैनमोनमःइतिमालांगुरोःकंठेस्थापयित्वास्वकेगले॥धा
येद्देवतापूजाजपकालेविशेषतः॥तुलसीकाष्ठसंभूतेमालेकृष्णा
नेप्रियेबिभर्तित्वामहंकंठेकुरुमांकृष्णवल्लभं समाप्यकर्मणि
थासंप्रार्थ्यगुरुंनिधारयेदिति॥ ॥इतिमालाधारणं॥अथसंध्याव
दनं॥ ॥मौंजीबंधनमारभ्यसायंप्रातश्चकालयोःमध्यानेपि
कर्तव्यंसंध्यावंदनमिष्टदं॥गायत्रीचैवसावित्रीतथैवचसरस्व

॥ ७

संध्यात्रयेचवित्तेयादेवताविष्वधिष्ठिता॥अथसंध्यावंदनकौउक्तः॥
पूर्वांसंध्यांसनक्षत्रामुत्तरांसदिवाकरां॥उत्तरामुपविश्यैवेत्याचार्यैः॥
पूर्वांसंध्यांप्रातःसंध्यां॥उत्तरांमाध्यान्हिकीं॥पुनरुत्तरांग्रहसामध्यं
त्॥उत्तरांसायंकालसंध्यां॥सदिवाकरांकुर्यादित्यर्थः॥तासायंकाल
संध्याअर्घ्यजपकालेउपस्थायैवकुर्यादित्यर्थः॥प्रातःसंध्यावंदनजप
स्यआसूर्यदर्शनात्तिष्ठेत्तत्तुपविशेत्वेतितिष्ठतोविधानात्॥सुधा
निधेतुमुख्यकालउक्तः॥उत्तमातारकोपेतामध्यमालुप्ततारका॥अध

मासूर्यसहितामातःसंध्यात्रिधामतां॥उत्तमासूर्यसहितामध्यमास्त ७०
मितरेवो॥अधमातारकोपेतासायंसंध्यात्रिधामतां॥आअर्धयाम
दासायंसंध्योमाध्यान्हिकीस्मृतेति॥आसार्धयामादासायमिति
कश्चित्पाठः॥उपासीतद्विजःसंध्यांप्राङ्मुखोदङ्मुखोपिवा॥गृहेत्वेक
गुणासंध्यागोष्ठेदशगुणास्मृता॥सहस्रगुणितानद्यांअनंताविष्णुस रामा
न्निधौ॥बहिर्दशगुणेतिवापाठांतरं॥अनंतानंतफलेत्यर्थः॥अथ ॥२६॥
प्राणायामः॥कनिष्ठानामिकाभ्यांचगृहीत्वावामभागतः॥हस्तोच्चर

एकालाख्याःमात्राःषोडशरेचनेद्वात्रिंशत्पूरणेप्रोक्ताःचतुःषष्टि
सुकुंभकेःशक्त्यास्यापुटेनैवपूर्ववायुंविरेचयेत्॥अंगुष्ठेनपुटं
धृत्वानासायाःदक्षिणंपुनःवामभागेनसंपूर्यधारयेत्सूर्णकुंभवत्
पंचांगुलीभिर्नासाग्रेपीडनंवायुधारणंमुद्रेयंसर्वपापघ्नीवान
प्रस्थग्रहस्थयोः॥कनिष्ठानामिकांगुष्ठैर्यत्तेश्वब्रह्मचारिणः॥ना
ग्रपीडनेप्रोक्तंमंत्रार्थस्मृतिपूर्वकं॥मंत्रमावर्तयेच्चित्तेत्रिषड्वारम
थापिवा॥एवंद्वादशवारंवाप्राणायामायमीरितः॥अयंसगर्भःसु

फलः मंत्रार्थस्मृतिवर्जितः॥अगर्भस्वल्पफलकः कुर्यात्तस्मात्सगर्भकं
विरचयेत्॥अथ गायत्रीप्राणायामः॥स्वरूपमाह योगयाज्ञवल्क्यः
सोंकारसप्तव्याहृतिगांगायत्रीसप्तारकां॥ओमापोज्योतिसंयुक्ता
मंते चोंकारसंयुतां॥दशप्रणवसंयुक्तां मंत्रमेवं हृदि स्मरेत्॥त्रिः प
ठित्वायत्ते प्राणः प्राणायामः सएककः॥मंत्रार्थस्तु॥ ॐ भामाभग
वान् विष्णुरधिकोच्चगुणत्वतः॥भूः पूर्णः॥भुवः लक्ष्म्यावरः॥सुवः
अनंतसुखः॥महः सर्वपूज्यः॥जनः सृष्टिकर्त्ता॥तपः आलोचनक

अ०
राम
॥२७॥

र्त्ता॥सत्यं उत्तमानंदज्ञानवान्॥ यः सवित्रंतर्गतः॥नः अस्माकं धिय
बुधीः॥प्रचोदयात् प्रेरयेत्॥सवितुः जगत्सवितुः देवस्य क्रीडादि
गुणविशिष्टस्य विष्णोः॥वरेण्यं भजनीयं॥भर्गः जगत्सोषणप्रेरण
कर्त्तातत्व्याप्तं॥अयंग्यंतर्गत परशुरामरूपं॥धीमहि ध्यायेमः॥
वयमितिशेषः॥ॐ मापोज्योतिरि सत्रा॥आपालानात्॥आपः
बहुरूपत्वात्स्त्रीरूपत्वात्॥विष्णोः बहुवचनांतस्त्रीलिंगशब्दवा
च्यत्वं॥ज्योतिः प्रकाशरूपंसः श्रेष्ठः अमृतं मोक्षदात्रज्वलस कल

गुणपूर्णो॥भूर्भुवःसुवरित्येतेषांअर्थांतरं॥हूनीमास्फूर्त्तिरूपत्वात्भूर्भु
वीर्यक्तेनोभुवः सुवःसुबलरूपत्वात्इतितैत्तरीयभाष्योक्तं॥इति
दशप्रणवसंयुक्तप्राणायामएवमष्टाक्षरादिप्राणायामेषुमंत्रा
र्थानुसंधानेरेचकुंभकपूरकमंत्रावृत्तिः॥वायुंध्यात्वाशक्त्यनुकारेण
कार्यो॥प्राणायामांश्चरेन्नीत्युयथाकालमतंद्रितः॥अहोरात्रकृतं
पापंतत्क्षणादेवनश्यतीतिस्मृतिः॥प्राणायामत्रयंनामश्वासोछ्वा
संध्यात्वाऽऊंप्रकारेणनववारंमनसादशप्रणवसंयुक्तगायत्रीमंत्रा



वृत्तिः॥ ॥इतिप्राणायामप्रकरणं॥अथमार्जनप्रकरणं॥ ॥ऊंच
ऋग्विधानेप्राणायामाद्यविधिवत्कृत्वाम्यतःसंयतेंद्रियः॥अथसंध्या
मुपाक्रिष्येइतिसंकल्प्यमार्जयेत्॥नवप्रणवसंयुक्तंत्वापोहिष्ठेति
पादकैःवामांगुलिमधःस्थाप्यश्रीतुलस्याकुशैर्द्विजः॥तर्जनीमध्य
माभ्यांवामुर्ध्निसिंचेज्जलंद्विजः॥नद्यांतीर्थेहृदेवाप्यांरोप्यतामादि
पात्रकेवामहस्तेजलंधृत्वाकुर्यान्मार्जनमात्मनइति॥आपोहिष्ठादि
भिःपूतंजलंभूमौनपातयेत्॥सूर्यश्चेत्यादिमंत्रेणमंत्रयित्वापिबेदपः॥

आदिशब्दात्मध्यान्हिकसंध्यायां॥आपःपुनंत्विति मंत्रेण॥सायंकालेऽ
ग्निश्चेति मंत्रेण ग्राह्यं॥ततःआचम्य नवभिःआपोहिष्ठेति पादकैःप्रा
नोदेवीरुषसिश्रुअर्घ्यंवेतिसप्तभिस्तथा॥इदमापःप्रवहतेत्यादि ऋग्भि
श्चमार्जयेत्॥ऋतंचेतिजपंविद्वान्पापमामरणांतिकं॥मनोवाक्कायजं
सर्वंक्षपयेद्घमर्षणमितिः॥आपस्तंबेर्दधिक्राव्णोत्यादिमंत्रैस्तुमार्जयेद्
त्रिवेनमाचक्षुषेतिजप्त्वापापंनरंक्षिपेत्॥पारिजातेतत्प्रकारउक्तःउध्व

॥२९॥

सप्तजलंहस्तदक्षगोकर्णवध्वंतंनिधाय नासिकाग्रेतुपापंचपुरुषंस्म

रन्॥दक्षनासापुटेनैवपापात्मानंव्यपोहयेत्॥तज्जलंमावलोक्यथवामभा
गेक्षितौक्षिपेत्॥मार्जनंमंत्रपूतस्यजलस्यप्राशनंतथा॥मनोवाक्कायजंपा
पंनाशयेद्घमर्षणं॥ ॥इतिमार्जनं॥अथार्घ्यप्रकरणं॥अर्घ्यमाहावसि
ष्ठः॥ ॥प्रोक्षोत्थायप्रतिसूर्यंदद्यादर्घ्यत्रयंद्विजः॥गायत्र्यासूर्यसंस्थि
त्यात्वाविष्णुसनात्तनाद्वेपादौचसमोत्तारविंवीक्ष्यजलांजलिं॥गोश्रृं
गमात्रमुध्वंसपाणिनाप्रक्षिपेज्जलं॥व्यासः॥ओंकारात्तोयमादायगाय
त्र्याचाभिमंत्रितं॥आदित्याभिमुखस्तिष्ठन्त्रिःक्षिपेत्संध्ययोर्द्वयोः॥अंगु

हाभ्यांतुतर्जन्योःस्पर्शनंतुविवर्जयेत्॥ऊर्ध्वकाउर्ध्वांतेअर्घ्यंदद्याच्चतुष्टयं
स्कंदार्घ्यदानेविशेषः॥सुप्तएवादिप्राछाचभूमिंतत्रांजलिंक्षिपेदितिसर्व
मुपासनसंध्यायाःपार्थिवेभ्यतोऽन्यत्रसूतकात्रौचविप्रमातुरभिन्नतः३
तिविष्णुपुराणे॥सूतकेमृतकप्राप्तिसोमचोरादिभयाभावेसंध्यावंदनस्य
नित्यत्वमुक्तं॥अकरणेप्रत्यवायश्चोक्तिरेवोक्ता॥तोपातिष्ठंतियेसंध्यास्वे
स्थावस्थाअपिद्विजाः॥चंडालास्तेतुविज्ञेयान्नतेषांसुगतिर्भवेत्॥हिं
संतिवेमहात्मानंभगवंतंदिवाकरमितिमंत्रेणार्घ्यंदत्वाकेशवादीन्शुद्ध









पक्षेतुहादशाक्षरंजपेत्सप्तमपक्षेतुतथासंकर्षणादिकान्॥ततःप्रद
क्षिणंकुर्यादसावादित्यसंज्ञतःसूर्यस्थितंहरिंध्यात्वाततःपश्चा
द्विराचमेत्॥ गायत्र्यर्घ्यं॥अथब्रह्मयज्ञनिमंत्रतर्पणे॥ ॥ऋक्सा
मार्षेभ्यःगायत्र्याचांजलिंदत्वाध्यात्वासूर्यगतंहरिंमंत्रतःपरिवत्सा
र्षेसमाचम्यसुरादिकान्॥तर्पयित्वानिपीड्यथवासोविस्रस्यचांज
सा॥अर्कमंडलगंविष्णुंध्यात्वेवत्रिपदींजपेत्॥इतिअत्रअर्घ्यानं
तरंतर्पणोक्त्यामध्येब्रह्मयज्ञोज्ञेयः॥तथाचव्याघ्रपादः॥दिवान्

षीश्चपित्रादीन्स्वशाखाविधिचोदितान्॥तर्पयेद्ब्रह्मयज्ञांतेस्नानांतेतुवि
शेषतःस्नानांतेऽनेनजलतर्पणमुच्यते॥ब्रह्मयज्ञकालस्तु॥आपस्तंब
शाखायांस्वाध्यायब्रह्मलेऽउक्तः॥मध्यंदिनेप्रबलमधीयतेतियएवंविद्वान्
महारात्रऽउषस्युदितइतिवा॥अत्रोषसीत्यनेनअरुणोदयोग्राह्यः॥प्रयु
षोहमुखंकल्पमुषःप्रयुषसीअपिऽयमरेण॥अहरारंभकालस्योरुणो
दयस्यकस्योषसःशब्दवाच्यत्वोक्तेः॥महारात्रिशब्देनरात्रित्रिभागंवा
त्रितीयभागोग्राह्यः॥महारात्रशब्दस्यअर्धरात्रवाचकत्वेपिमुख्यार्थ

:

:

कालस्यकर्मकालत्वाभावात्॥तस्यकालमुख्योग्रहणेतुरात्रितृतीयभागेअ
र्धरात्रांशघटिकात्रयस्यप्रवेशश्चमुख्योवा॥इदंहिदर्शस्वल्पत्वेरात्रि
तृतीयभागेआमध्यान्हःक्रियाःसर्वाइतिवचनेनसूर्योदयात्पूर्वंप्रातः
संध्यावंदनादिमध्यान्हिकसंध्यावंदनपर्यंतंसर्वकर्मणांकर्तव्यत्वोक्तेः
तस्मिन्दिवसेअर्धरात्रंतब्रह्मयज्ञकालविधायकंमहारात्रपदंनतुप्रति
दिनं॥प्रतिदिनंतुअरुणोदयेवासूर्योदयेवामध्यान्हेवाब्रह्मयज्ञः क
र्तव्यः॥उषस्युदितइत्यादिविधानात्॥यत्तुवसिष्ठेन॥कृतनित्यक्रियाकां

ऽः व्रतहोमोजितेंद्रियःस्नानमात्राचीनभोगेतुयत्नतिष्ठेज्जलाशयः॥आपं
समीपेनियतःब्रह्मयज्ञंसमाचरेदिसुक्तं॥मध्यंदिनेप्रबलमधीयतेति
श्रुतेश्चउक्तंचतत्॥अस्मिन्विषयेकेनचिन्नित्येनअरुणोदयेस्नानासं
भवेवाज्ञेयंश्रीमदाचार्यैः॥अर्घ्यानंतरंअरुणोदयेतर्पणविधानेन
तर्पणात्पूर्वंअरुणोदयएवब्रह्मयज्ञस्यप्राप्तेः॥आसूर्योदर्शनात्तिष्ठ
दितितर्पणानंतरक्रियमाणगायत्रीजपकालेसूर्योदयपर्यंतंअवस्था
नोक्त्याब्रह्मयज्ञतर्पणस्यअरुणोदयकालिकत्वसिद्धेःवसिष्ठस्मृ

अ॰
॥३२॥

पेक्षयासदाचारस्मृतेरुक्त्यासवाक्यस्यप्राबल्यात्॥श्रीमदाचार्यैः
स्मृतिषुविरुद्धासुप्राप्तसंशयनिवृत्तयेसम्यगनुष्ठानार्थंकर्मानुष्ठानम
ध्येहरिस्मरणार्थंचव्यासवाक्यानामुदाहृतत्वात्॥नहिसदाचारस्मृति
मात्रेणशौचाचमनादिकर्मानुष्ठानसिध्यतिनालस्यकारविधेरनुक्त
त्वात्॥अत्रशौचादिकरणप्रकारज्ञानार्थंस्मृतिषुदृष्टंव्यासुसतिषुस्मृ
त्यैवकालस्यक्रमादेश्चग्रहणेसदाचारस्मृतौवैयर्थ्यापत्तेः॥नचस
दाचारस्मृतिः॥सावकाशागायत्र्याचांजलिंदत्वाध्यात्वासूर्यंगतंहरिंमं

ततः परिषेचनाथ समाचम्य सुरादिकान्नातर्पयित्वा निषीद्याथ वासोवि
रूर सूचांजसा॥ऊर्कमंडलगं विष्णुं ध्यात्वेवत्पदीजपेत्॥इतिक्रम
नियामकत्वप्रयार्थशब्दयोः निरवकाशयोस्तेनतद्विरोधापत्तेः॥
अतएवपूर्वमीमांसायांपंचमाध्यायेद्वादशाहेसत्रयोगेअध्वर्युर्गृह
पतिंदीक्षयित्वाब्रह्माणंदीक्षयतीत्यादौत्वाप्रत्ययस्यसमानकर्तृक
योःपूर्वकालइविहितत्वात्॥श्रोतंकर्मआश्रित्ययजमानदीक्षानं
तरंब्रह्मणोदीक्षाकृताननुस्मृतीनांप्राबल्यं॥निर्णयत्वेनदोर्ब



ल्यात्॥सदाचारस्मृतेरुदाहृतव्यासस्मृतेः॥निर्णयकत्वेनप्राबल्या
दनुसारेणैवकर्मानुष्ठानस्यावश्यकत्वात्॥विष्णुतीर्थायेत्यादि
तर्पणापूर्वंसंध्यांगत्वेनयोजपेत्॥गायत्रीचान्यमंत्राश्चतज्जपोनिष्फ
लोभवेत्॥इतिप्रसवायोक्तेश्वानुनहिकर्मणिकमांरसइतिनिषे
धात्॥संध्यावंदनाख्यकर्ममध्येब्रह्मयज्ञतर्पणंचेतिप्रधानकर्मद्वयं
कथंकार्यमितिचेन्नअस्यनिषेधस्यसामान्यत्वेनगायत्र्याचांजलिंदत्वा
अथब्रह्मयज्ञानंतरंसमाचम्यसुरादिकान्तर्पयित्वा॥वासःवस्त्रंनिष्पी

छ० ॥३४॥

उपविस्तस्त्रिपदीजपेदितिशेषवाक्येनबाधात्॥अपवादाभावस्थ
लेऽस्यनिषेधस्यस्तावकात्वात्॥अतएवज्योतिष्टोमादिकर्मकर्त्रि
भिःबहुदिनसाध्यज्योतिष्टोमध्येनित्यकर्मस्नानसंध्यावंदनादिकं
विशेषवाक्यबलात्क्रियतएव॥अथवार्घ्यांतमेवप्रधानसंध्या॥ज
पोपस्थानादिकंतुतदंगं॥अतएवसूतकादौअर्घ्यांतमेवसंध्यावं
दनंक्रियते॥जपोपस्थानादिनिषेधान्नक्रियते॥तावन्मात्रस्यैवप्र
धानसंध्यागत्वेनब्राह्मएवसिद्धेः॥अतोनहिकर्मणिकर्मारंभइति

अ०
रामा
॥३४॥

निषेधस्यप्राप्तिरेवनास्ति॥ ॥इतिब्रह्मयज्ञकालनिर्णयः॥अ
थब्रह्मयज्ञकरणप्रकारः॥ ॥प्रक्षाल्यपादौहस्तौचाचम्यकु
शासनेऽउपविश्यप्राङ्मुखोवादर्भपाणिरुदङ्मुखइतिवाआचम्य
नंतुआपस्तंभश्राखायांदक्षिणतःउपविश्यहस्तावप्रक्षाल्यत्रिरा
चमेत्॥द्विःप्रमृज्यसव्यंदक्षिणंपादंप्रक्षाल्यसव्यपाणिःप्रोक्षयति
शिरश्चक्षुषीतिनासिकेश्रोत्रेहृदयमालभ्येसुतांदक्षिणतऽउपवीत
यतोपवीतंदक्षिणभागएवस्थापयेत्यर्थः॥अवनिमृज्यप्रक्षाल्य

त्रिवारंमुखमध्येगायत्रीपादत्रयेणउदकंप्रणीयात्॥द्विःपरिस्तृ
त्यादेवीआपोहिष्ठेत्यादिनपादेन॥ओंभूरित्यादिद्वादशमंत्रैःपूर्वोक्ते
आचमनस्थलेषुक्रमेणउदकस्त्रोक्षितव्यं॥ततआचम्यलोमतः॥
गायत्र्यात्रिःपिबेत्पादैरापोहिष्ठेतिनवभिःस्रोत्रैः॥व्याहृति
भिःशिरोमंत्रैरंगानिब्रह्मयज्ञक्रमेण॥ततःप्राणानायम्यब्रह्मयज्ञेनय
क्ष्यइतिसंकल्प्य॥वामपादोपरिदक्षिणपादंवामहस्तोपरिदक्षि
णहस्तंस्थापयित्वातोहस्तौकदलीपुष्पवत्कृत्वा॥अथवामहस्तं

गुष्ठंनधृत्वादक्षिणतर्जन्यांघंगुलिचतुष्टयंवावामांगुष्ठेतर्जनी
मध्येकुर्यात्श्रीतुलसीसहितंस्थापयित्वाकुक्कुटासनेनोपविश्य
दक्षिणजानूपरिन्यसेत्॥ततःविद्युदसिविद्युन्मेपापमानम
तासत्यमुपैमीतिमंत्रमुक्त्वासकृत्सकृत्प्राणवोसकृत्निरोध्या
हृतीश्चोच्चार्यततःगायत्रीपादत्रयंअर्धर्चत्रयंऋक्त्रयंउच्चारये
त्॥ततस्तत्सवितुरेण्यं॥भर्गोदेवस्य
धीमहिधियोयोनःप्रचोदयात्॥इतिपादत्रयं॥ततः॥ततस्वि

वुर्वरेण्यंभर्गोदेवस्यधीमहि॥धियोयोनःप्रचोदयात्॥इतिअ
र्धर्चशः॥ततः॥अग्निमीळेइतिसूक्तं॥वायवायाहीतिसूक्तपु
रुषसूक्तं॥अग्निर्वैदेवानामवमोविष्णुरितिब्राह्मणं॥अथम
हान्नतंएषपंथेयुपनिषदं॥इषेत्वोर्जेतियजुर्वेदं॥अग्नआया
तिसामवेदं॥इन्नोदेवीरित्यथर्वणवेदं॥नारायणंसुरगुरुंअ
च्यानन्दशोचक्षुमितिभारतं॥जन्माद्यस्यतइत्यादिभागवतं॥
अथशिक्षांप्रवक्ष्यामीतिशिक्षा॥समाम्नायस्यसमाम्नातइ









कल्पसूत्रं॥वृद्धिरादैचेतिव्याकरणसूत्रं॥मयूरसतजभनेति
छंदः॥पंचसंवत्सरमयमितिज्योतिषं॥गोःम्नेतिनिघंटुः॥अथेत
स्यसमाम्नायस्येतिनिरुक्तं॥अथातोधर्मजिज्ञासेतिपूर्वमीमां
सां॥अथातोदेवीमीमांसा॥तथाश्रीमद्भाष्यादिकंचकिंचित्संठिख
तछंयोरावणीमहेइत्यादिकमुक्त्वायस्यस्मरणेतिसर्ववेदप्रतिपाद्य
विष्णोःसमर्प्यपुमरावमनंद्वयंकृत्वादेवादितर्पणंकुर्यात्॥तत्रका
रमाह॥व्यासः॥एकैकमंजलिंदेवाःद्वौद्वौचऋषयस्तथा॥अहंतिपि

तरस्त्रीस्त्री स्त्रियश्चैकैकमंजलिमिति॥अत्रदेवादितर्पणेदेवादिनाम्नामे
वमंत्रत्वात्॥कर्मारंभेमंत्रावश्यकत्वात्ऋषितर्पणेऽप्रतर्चनस्त्व
युत्तरप्यनुद्यादिप्रकारेणद्विवारमृषिनामग्राह्यं॥एवंपित्रतर्पणेपि
पित्रोरामंत्रिवारंग्राह्यं॥अनामिकयाहेमंधृत्वातर्जन्यांरोप्यमेवच॥ज
लदर्भस्वधामंत्रैर्गोत्रनामतिलैर्भवेत्॥ताम्रगोकर्णपात्रेणतर्पयेदन्य
था॥ऊनत्रिव्येनसव्येनपाणिनादक्षिणेनतु॥सा लिग्रामशिलातीर्थ
पुत्तेनैवजलेनहिदेवादितर्पणंकुर्यादन्यथानिष्फलंभवेत्॥सव्येन



पाणिनावामहस्तेना॥अनारब्धेनस्पृष्टेनदक्षिणेनपाणिनातर्पणं
कुर्यादित्यन्वयः॥इदंतुऋग्वेदिनां॥यजुर्वेदिनांतुअंजलिनातर्पण
मुक्तं॥कुशाग्रैश्चैवदेवानांऋषीणांकुशमध्यतः॥पित्रर्णमग्रमूल
त्यांकुर्यात्तर्पणमंजसा॥उपवीतीदेवतांश्चनिवीतीतर्पयेदृषीन्॥
अपसव्येनतुपित्रूंविभक्त्यातुद्वितीययेति॥पित्रर्णंतिलतर्पणे
विशेषमाह॥योगयाज्ञवल्क्यः॥येचपाणिस्थलेस्पृष्टाःरोमकूपेतु
पैधृताः॥तैस्तिलैस्तर्पणंकुर्वन्पितृघातीभवेद्द्विजः॥तस्मात्तेमर्षिणंवं

धेतु धार्यो विप्रैः समाहितैः॥ जलस्थस्तु जले कुर्यात्तर्पणं स्थलगः स्थले॥ त
र्पणं पितृतर्पणं॥ वामपादं जले कृत्वा दक्षपादं स्थले तथा॥ हारीतः
वसित्वा वसनं शुष्कं स्थलं विस्तीर्य बर्हिषी॥ देवादितर्पणं कुर्यान्नपा
त्रेणोदके तथा॥ हेमरौप्यमयं पात्रं कांस्यतांम्रसमुद्भवं॥ देवादितर्प
णेष्वाद्यं मृन्मयं तु परित्यजेत्॥ मार्जनं तर्पणं श्राद्धं न कुर्याद्वारिधा
रयेत्तारवो शुक्रत्रयोदश्यां सप्तम्यां निशि संध्ययोः॥ नंदासुजन्म
दिवसे मघायां भौम वासरे॥ मृतपुत्रकलत्रार्थी न कुर्यात्तिल



तर्पणमिति॥ तर्पयेत्साज्यतिलो देवान्ऋषींश्चोदङ्मुखः पितॄन्॥ द
क्षिणाग्निमुखश्चैव तर्पणस्य विधिस्मृतः॥ विवाहे चोपनयने चौ
लेसतियथाक्रमं॥ वर्षमर्धं तदर्धं च नेयेकेतिल तर्पणमिति॥ अ
स्याः अपवादः॥ विवाहे पातसंक्रांतौ ग्रस्तेन्दौ निशि भास्करौ नैव
वौदिदोषोस्ति युगादिषु मन्वादिषु॥ विवाहे विवाहमुंजी चौलेषु
नांतेषु इत्यर्थः॥ अंगुलयग्रैस्तु देवादीन्कनिष्ठामूलतोऋषीन्॥
पितॄन्दिव्यानदिव्यांश्च तर्जन्यांगुष्ठमध्यतः॥ तत्र दिव्याः॥ स्वसूत्रो

त्तः॥अदिव्याः॥जनकादयः॥इतिस्कांदो॥जनकादयः पितस्तुकाल ७०
तरंगेमहालयप्रकरणेउक्तास्त एवतर्पणेज्ञेयः॥देवऋषिपितृ
स्तुस्वस्यगृह्यसूत्रोक्ताज्ञेयाः॥यद्यप्याश्वलायनसूत्रेदेवतास्तर्पय
तिप्रजापतिब्रह्मेत्येवोक्तेः॥अग्निविष्णोरनुक्तावपित्रोनकस्यते
तयोरत्रैव॥तर्पणकालेआदौतोगृह्यतो॥तथा ऋषितर्पणेपि रामा
सूत्रेसनका दीनामनुक्तावपिमत्स्यपुराणे॥सनकश्चसनंदनश्च ॥३९॥
तृतीयश्चसनातनः॥कपिलश्चासुरिश्चैववोढुः पंचशिखास्तथा

तसर्वेतृप्तिमायांतुमयादत्तांबुनाखिलाइसुतेः॥तेपितृतर्पणेऽ षि
स्मृतेः॥पितृतर्पणेस्वसंबंधादिकंचग्राह्यं॥संबंधंनामगोत्राएति
यावत्स्वादिरूपतां॥स्वधाशब्दंनमःशब्दंउक्त्वासंतर्पयेत्सिद्ध
इतिबोधायनोक्तेः॥प्रपितामहेचनिर्दिष्टोवासुदेवःपुरस्सरः॥पि
तामहेचनिर्दिष्टःतथासंकर्षणःप्रभुः॥पितृसंस्थस्तुविज्ञेयःप्र
द्युम्नोत्यपराजितः॥इतिविष्णुधर्मोत्तरे॥पित्रादीयंतर्पयामिवस्वा
यंतर्पयामित्येवंप्रद्युम्नादीनांग्रहणमुक्तं॥स्नानंमज्जनपूर्वंतुक

चित्कर्तुन्नरोक्यते॥तत्रादौब्रह्मयज्ञार्थंमंत्रस्नानंविधीयते॥पुण्यका
लमितंतुकेवलंतर्पणंस्मृतमितिप्रातःकालेब्रह्मयज्ञादिकेकृतेस
तिमध्येसंक्रमणादिपुण्यकालेप्राप्तेसतितन्निमितंपुनस्तर्पणम
त्रंकार्य॥नब्रह्मयज्ञोपिकार्यइत्यर्थः॥तथाचस्मृत्यंतरं॥नैमित्तिकंत
र्पणंतुकुर्याद्रात्रावपिद्विजः॥तीर्थांतरेपितद्वत्स्यात्एकमप्यसक्
द्वेत्तु॥नैमित्तिकंतर्पणंतुब्रह्मचाहनिबह्वृचः॥रात्रौप्रहरपर्यंतं
वाकर्मीलिकारयेत्॥विनासोरंब्रह्मयज्ञंनकृतानिदिवायदि॥श्रा



रम

गतर्पणंयामेप्रथमेमधुवद्भवेत्॥पयानीरंचरुधिरंक्रमाद्यामेषुचत्रि
षु॥श्राद्धात्पूर्वंब्रह्मयज्ञंनकुर्यात्तर्पणंतथा॥पित्रोश्राद्धानंतरंतुद्वयंक
र्यंतुबह्वृचः॥तर्पणेपवित्रमाह॥सुमंतुःसमूलाग्रोवितोभर्तुकुशोद्वो
श्लिलेकरेतथापसव्येद्विजस्त्रीबिभृयात्सर्वकर्मसु॥बोधायनः॥ह
स्तयोरुभयोर्द्वौद्वौबिभृयात्सासनेपिचेति॥व्यासः॥तर्पणादीनिकर्मा
णिपित्रर्थानिकानिचित्॥तानिस्युर्द्विगुणैर्दर्भैःसप्तपत्रैर्विशेषतः
इति॥इदंतुसुवर्णपवित्रवत्तस्मिन्सतितुविशेषफलप्रदंच॥कुशा ह

स्तस्तुनाचामेत्कदाचिद्द्विजोत्तमः॥प्रायश्चित्तेनयुज्येतदूर्वाहस्ततथै
वचरंतिव्यासस्मृतिःशंखलघुहारीतः॥पथिदर्भाश्चितोदर्भाःदर्भाये
यज्ञभूमिषुतर्पणासनपिंडेषुषड्दर्भान्परिवर्जयेत्॥मासेनभस्यमा
वास्यांगृहीतास्तत्रयेद्विजैः॥आयांतयातास्तेदर्भाःनियोज्यास्युःपु
नःपुनरिति॥नभसिश्रावणेमासिपुनःपुननियोज्याः॥पूर्वंस्नानत
र्पणादौयेगृहीताःतएवद्वितीयस्नानादौग्राह्याइत्यर्थः॥एतान्तप
ऊपहोमेतथादानेस्वाध्यायेपितृतर्पणे॥अनामिक्यांहेमधार्यंत

जैन्यांरौप्यमेवच॥नरौप्यंकेवलंधार्यंदेवेपित्र्येचकर्मणि॥कुशपवि
त्रग्रंथिलक्षणं॥चतुरंगुलमग्रंचग्रंथिरेकांगुलोभवेत्॥द्व्यंगुलंरज्जु
वलयंपवित्रस्यचलक्षणं॥यज्ञोपवीतेमौंज्यांतुतथाकुशपवित्रके
ब्रह्मग्रंथिंविजानीयात्अन्यत्रतुयथारुचिः॥ब्रह्मग्रंथिंपवित्रग्रंथिं
प्रथमंलंघयेत्पूर्वंद्वितीयंलंघयेत्॥तयोस्तुपर्वणोमध्येपवित्रंधार
येद्द्विजः॥कुत्रचैनवापवित्रेणयेनकर्मणिकारयेत्॥ब्रह्मग्रंथिंविस्र
ज्यैवकर्मतैत्तसजेद्द्विजः॥अग्रेंगुल्यांस्थितोदर्भःतपोवृद्धिकरोभवे

त्॥मध्येप्रजाकरोमूलेसर्वार्थसाधकः॥एवंहि फलभेदःस्यात्स्थान
भेदेनधारणात्॥जपकर्महरायेवैअव्यक्तास्तुसुरोत्तमे॥सपवि
त्रंद्विजंदृष्ट्वाविद्रवंतिदिशोदश॥ब्रह्मयज्ञेजपेत्तस्मात्पवित्रंधारये
द्द्विजः॥ ॥इतिपवित्रप्रकरणादेवर्षिपित्रतर्पणानंतरंसंक्षेपतःस
र्वतर्पणमुक्तंविष्णुपुराणे॥आब्रह्मस्तंबपर्यंतंजनास्तर्प्यंतिभुव
न्॥क्षिप्तंक्षीरोदकंभूमौकुर्वन्संक्षेपतर्पणमिति॥तर्पणानंतरंव
स्त्रनिष्पीडनमाह॥योगयाज्ञवल्क्यः॥यावद्देवान्ऋषींश्चैवपितॄंश्चैवत



तर्पयेत्॥तावन्न पीडयेद्वस्त्रंयेनस्नातोभवेद्द्विजः॥येनपरिधानव
स्त्रेणेसूर्यंशवस्त्रंनिष्पीडयेद्भूमौनदारयेन्नसंक्रमे॥चतुर्दश्यांश्रा
द्धदिनेनचक्षारेणयोजयेत्॥जीवत्पितृकस्यतर्पणेविशेषः॥कव्य
वाहोनलःसोमयमश्चैवार्यमातथा॥अग्निष्वात्ताबर्हिषदोआज्यपा
सोमपास्तथा॥सयदिस्याज्जीवत्पितृकःयेभ्योदद्याज्जलांजलिंमिति
निष्पीडनानंतरंवस्त्रप्रसरणं॥तर्पयित्वानिपीड्यापवाचोविसृज्यस्व
स्त्रांजलेर्याचार्योक्तेः॥प्रागग्रमुदग्ग्रंवाधौतंवासःप्रसारयेत्॥दक्षि

एणाग्रेपश्चिमाग्रंचपुनश्चक्षालनंभवेत्॥ ॥इतितर्पणप्रक
रणं॥अथजपः॥ ॥तस्यस्थानविशेषः॥इहैवैकगुणःप्रोक्तोगोष्ठे
तद्गुणोभवेत्॥सहस्रंपुण्यतीर्थेषुह्यनंताविष्णुसंन्निधौ॥विष्णोस्तुपू
र्वदिग्भागेजपोह्युपचयधनः॥दक्षिणेत्वानदःसस्यात्पश्चिमेमोक्षसा
धनः॥लक्ष्मीप्रदश्चोत्तरेस्याद्वाग्नेसर्वसिद्धिदः॥इतिस्थानांतरे॥तच्चब
ह्यशरीरभेदाद्विविधं॥बाह्यफलभेदःस्मृतौ॥पुष्पासनेदुःखनाशःकं
बलेदुःखमोचनं॥व्याघ्रचर्म्माजिनेवृद्धिरायुःप्रज्ञायशोबलं॥भूमिका

ष्टत्वगादीनामासनंपरिवर्जयेदितिविशेषः॥आसनंतुजपेध्याने चै
लाजिनकुशोत्तरंचेलाजिनेप्यर्थे॥भूमौकुशासनंस्थाप्यतदुपरि
व्याघ्रचर्म्माजिनादिकंतदुपरिवस्त्रंकंबलादिवस्त्रमिति॥बाह्यासनं॥
शरीरासनंतुत्रेधा॥पद्मस्वस्तिकवीरभेदेनोक्तंपंचरात्रे॥ऊर्वोरुपरिवि
न्यस्यसम्यक्पादतलेउभे॥पद्मासनमितिप्रोक्तंयोगिनांहृदयंगमं॥ऊर्वो
रधस्तात्सम्यक्त्वकृत्वापादतलेउभे॥ऋजुकायोविशेद्योगीस्वस्तिकंतत्प्र
कीर्त्तितं॥एकपादमधःकृत्वाविन्यस्योरोत्तथोत्तरं॥ऋजुकायोविशेद्योगीवी

रासनमितीरितं॥ ॥इतिआसनविधिः॥अथजपमाला॥ ॥हस्ते
नवामालयावागायत्रीजपमाचरेत्॥वेदमातानुगायत्री वेदपूर्वसुगा
यते॥तस्माज्जपेच्चगायत्रीपर्वभिर्द्विजसत्तमइत्युक्तेः॥संध्यावंदनगा
यत्रीजपःहस्तपर्वभिःशिष्टैर्गी यतेऽष्टमहामंत्रगायत्रीजपस्तु
जपमालयाऽक्षाबीजमात्रामणयःश्रेष्ठास्युःजपकर्मणि॥धात्री
फलास्थिमात्रस्तुमध्यमाकमलासना॥बदर्यबीजप्रमाणस्तुक
निष्ठामणयःस्मृताः॥अक्षास्थिमात्रारुद्राक्षिप्रमाणः इतिकेचि



त्॥ कमलबीजमध्यप्रमाणः इतिगुरवः॥एवमुत्तरत्रास्थिशब्दे
बीजंग्राह्यं॥स्वर्गापवर्गदामालाजैरेतस्वर्णरत्नजाश्वेतपद्माक्षमा
लाभिर्जपस्यहमितंफलं॥तुलस्यास्तुफलंनालंवक्तुंशेषोपितत्व
तः॥तुलसीकाष्ठमणिभिः कृतायाजपमालिका॥गायत्र्यादिजपः
प्रोक्तस्तत्तोभीष्टदायकः॥इतिअष्टोत्तरशतंसंख्यामणीनांश्रेय
सीभवेत्॥तदर्धंमध्यमाप्रोक्ताअर्धमासप्तविंशतिः॥अत्रफलं
त्रिंशदक्षकृतामालाधनदाजपकर्मणि॥अष्टाविंशतिसंख्याके

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

रक्षेःपुष्टिप्रदाभवेत्॥पंचविंशतिसंख्याकैरक्षैर्मुक्तिंप्रयच्छति॥म
णिस्तुक्षालयेत्संचगव्यैर्वेदांतविद्यया॥आरोपयेत्सोमसूत्रेणाएकै
णादिवर्जितैः॥कार्पासेरजतस्वर्णैसूत्रेप्रोताःप्रशोधिताः॥पट्टेनपट्ट
भागेचमुखभागेमुखेनच॥संबंधासूक्ष्ममणिभिर्मध्येमध्येचसांतर
रूत्वातुकटकाकारंतद्वथेतुमणिंन्यसेत्॥स्मृयंतरेअक्षमालाप्र
तिष्ठावुक्ता॥तत्रपुण्याहंवाचयित्वातत्रदेवस्याग्नेगोमयेनोपलिप्य
तत्रकुशैरनवस्तोपरिमालांप्रस्थापयनवस्तेणाछाद्यतत्समीपस्थ

राम
॥४५॥

डिले कुंडलेवाअग्निंप्रतिष्ठाप्यअग्नेःपरश्चरामंध्यात्वापापशोषण
दहनादिकंकृत्वातत्न्यासादिकृत्वापीठावरणदेवतापूजांकृत्वानं
नारायणा ष्टाक्षरादिमंत्रेणदेवताध्यानंकृत्वा॥ तथाग्निपुरुषंब
ध्यांजलौ॥मेघश्यामंचतुर्भुजंवरदाभयहस्तकं॥अक्षमालांचबिभ्र
णंजनार्दनपुरुषंचध्यात्वासमिच्चरुघृतैअष्टाक्षरमंत्रैःप्रत्येकमष्टो
त्तरशतंजुहुयात्॥अक्षमालांततःशुद्धेसालिग्रामेसमर्पितां॥अष्ट
क्षरादिमंत्रैस्तुमंत्रितांगुरुहस्ततः॥गृहीत्वाकुंकुमाक्तांतांप्रणम्यजप

माचरेत्॥माध्यमानामिकांगुष्ठैर्जपेन्नान्यैःकदाचन॥तर्जन्यानस्पृशेन्मा
ल्यंकनिष्ठेनकदाचन॥जपमालाप्रगोप्तव्याजपकालेसुमेधसा॥परह
स्थितामालानिष्फलाजपकर्मणि॥मालांचजपकालेतुगुरोरपिन
दर्शयेत्॥पातेतुजपमालायाःमेरोरुल्लंघनेसति॥प्राणायामत्रयंकृ
त्वाघृतपोत्रंनमाचरेत्॥जप्तेष्टितमालायासाजपेनिष्फलाभवेत्॥
नवामेनस्पृशेन्मालांकरेणब्राह्मणःक्वचित्॥करेकंठेथवांगुल्याध
रयेन्नकदाचनेतिब्रह्मतर्के॥मध्यांगुल्यांकर्षणंस्यात्सर्वसिद्धिप्रद



यकं॥नान्यंगुलिभिराकर्षेन्ननरवेश्चतथास्पृशेत्॥मुखमारभ्यप
ष्ठांतंजपन्मेरोःप्रदक्षिणं॥भ्रामयित्वापुनर्वक्त्रंप्रारभ्यजपमाचरे
दितिब्रह्मतर्के॥जपमालाभावेपर्वभिर्जपमाह॥नारदः॥मध्यम
नामिकामध्यंपर्वमेरुंतयारुंतंआरभ्यानामिकामूलंप्रदक्षिणंत
याजपेत्॥मध्यमामूलपर्यंतंगणयेदग्रपर्वसु॥इतिश्रीनकेनाप्रा
तनीभ्यंतरेब्रह्मामध्यान्हेहृदिसंस्थितेसायान्हेमुखमध्येतुगायत्री
जपमुत्तमांब्रह्मलोकानोकरोप्रातःसायंचाधःकरोपुनःमध्येस्कंधमु

नाभ्यंतुजपएवमुदाहृतः॥भुजयोःस्कंधयोर्वामध्येकरोकृत्वाजप
कार्यइत्यर्थः॥अंगुलीनांवियुज्येतकिंचिदाकुंचितोकरो॥अंगुलीना
वियोगेतुछिद्रेषुस्रवतेजपः॥अधोहस्तस्तुपित्र्यश्चोमध्यहस्तस्तुरा
क्षसः॥बद्धहस्तस्तुगांधर्वःऊर्ध्वहस्तस्तुदैवतइति॥अधोहस्तः॥नाभे
रधःकृतःपित्र्यश्चानंफलंइत्यर्थः॥एवमुत्तरत्रापिमनःप्रहर्षणं
श्रेयश्चमोनंमंत्रार्थचिंतनं॥अव्यग्रमनालस्यंजपसंपत्तिहेतवः॥हो
मंप्रतिग्रहंदानंभोजनाचमनेजपः॥बहिर्जानुनकुर्वीतसांगुष्ठंतुसम

अ०
॥४७॥

चरेत्॥निष्ठीवेज्जंभणेक्रोधेनिद्रालस्यक्षुतेमदे॥पतितंत्यजसंलोकेद
ग्स्वेतेषुचाचमेत्॥सुमंतुः॥अपवित्रकरोनग्नःशिरसिप्रावृतोपिच॥
प्रलपन्नेजपेद्यावत्तावन्निष्फलमियात्॥नारदः॥श्वदृश्यैःपतितादृ
श्यवीरेश्वदृश्यैस्तथा॥दृष्ट्वातोयमुपस्पृश्यस्पृष्ट्वास्नानंसमाचरेत्॥स्नान
भोजनयोर्होमेजपेवेदंवधावनं॥पुरीषमूत्रोत्सर्गेचसप्तमोनंविधीयते
जपादौत्रियमाणेतुयद्यागच्छेद्द्विजोत्तमः॥अभिवाद्यजनंविप्रंयोगस्ये
मंनकीर्त्तयेत्॥आचार्यंविष्णुभक्तंचभगवन्मंदिरंजलं॥अश्वत्थमग्नि

रज

सर्के चएष्टीकल्पेजपेत्तु॥छिन्नपादातुगायत्रीब्रह्महत्याविनाशनी
अछिन्नपादागायत्रीब्रह्महत्यांप्रयच्छति॥तस्मात्सदत्रयंछिन्नाज
पयज्ञंसमाचरेत्॥संपुटेकषडोंकारगायत्रीत्रिविधामता॥त
त्रैकप्रणवाग्राह्यागृहस्थैर्ब्रह्मचारिभिः॥गृहस्थोब्रह्मचारीच
प्रणवाद्यामिमंजपेत्॥अंतेयःप्रणवंकुर्यान्नासौवृद्धिमवाप्नु
यात्॥संपुटंचषडोंकारांगायत्रीचजपेद्यदि॥एकोंकारगाय
त्रीमाह॥व्यासःपूर्वमोंकारंपूर्वमुच्चार्यभूर्भुवःस्वस्तथैवच
+कारव्याहृ
+वल्क्यः॥१

अ०
रास
॥४८॥
संपुटमाह योगयाज्ञ

गायत्रीप्रणवंचांतेगायत्रीसंपुटमतेति॥मनुःषडोंकारमाह॥
तिस्रोव्याहृतयःपूर्वंप्रथमोंकारसंयुताः॥पूर्वंपुनर्व्याहृतीनांम
स्त्रयंतयोस्तथा॥एतयाजप्तयानित्यंवाङ्मयंजपितंभवेदि
ति॥अस्यायंभावः॥प्रथमतःएकमोंकारमुच्चार्यततःप्रथक्
प्रणवसहितंव्याहृतित्रयमुच्चार्यततःसप्रणवगायत्रीचोच्चार्य
तिपिप्रणवमुच्चारयेदिति॥तथाचायंमंत्रोच्चारणप्रकारः॥ॐ ॐ
भूःॐभुवःॐस्वःॐ तत्सवितुर्वरेण्यं भर्गोदेवस्यधीमहि॥धि

योयोनश्चोदयात्तूष्णंकुशहस्तेनजपकरेफलमाहाहारीतःकुश ७०
हस्तेनयज्ञमंदानंचैवकुशैःसहाकुशहस्तस्तुयोभुंक्तेपुण्यंतस्यन
गण्यतेकुशमूलस्थितोब्रह्माकुशमध्येजनार्दनःकुशाग्रेशंकर
विद्यात्रयोदेवाव्यवस्थिताइतिस्मरन्नोंकारंतुगायत्रीनिबध्नीयाछि
खांद्विजःपुनराचम्यहृदयंबाहुस्कंधौचसंस्पृशेत्इतिव्यासस्मर राम
तिःइदंत्रिखाबंधनंसर्वकर्मविषयंयज्ञोपवीतलक्षणमाहाम ॥४९॥
नुःकार्पासमुपवीतंस्याद्विप्रस्योर्ध्ववृतत्रिवृत्त्रिवृदूर्ध्वमनायुष

मधोनाभेस्तपक्षयगतस्मान्नाभिसमंकुर्यादुपवीतंविक्षणःतत्रै
कोग्रंथिःपवित्रग्रंथिःत्रिषुछिन्नेषध्यातमनाध्यात्वतंचयत्
वृतंचाशुचिनायस्याद्वृक्षानिर्मीतेस्पृजेत्तासाविभ्यादशवृक्षाद्विः मु
संत्रिताद्विस्तुक्षालयेत्ओंकारःसाग्निकागोश्वसोमःपितृप्रजा
पतिःवायुःसूर्यःसर्वदेवाःतत्राहुर्दैवतासदादेवेर्षितंब्रह्मसू
त्रंधारयेन्मंत्रतःशुचिःमंत्रस्तुयज्ञोपवीतंपरमंपवित्रमिसा
दिःस्तनादूर्ध्वमधोनाभेस्तन्नधार्यंकदाचनाआपृष्टवंशनाभ्यंतु

यावद्वैविंदते कटिं॥यज्ञोपवीते द्वेधार्ये श्रौते स्मार्ते च कर्मणि॥व
स्त्राभावेत्तृतीयंतुगृहस्थोधारयेद्द्विजः॥चतुर्थमुत्तरीयार्थेआय
कामोबृहन्यपि॥गृहस्थस्यत्रिदंप्रोक्तमेकंवैब्रह्मचारिणः॥उप
वीतमलंकारस्त्रजंकरकमेवच॥नोपाहनौचवासश्चधृतमन्येन
धारयेत्॥मेखलामजिनंदंडमुपवीतंकमंडलुं॥अप्सुप्रास्यविन
ष्टानिधार्याण्यन्यानिमंत्रतः॥ ॥अथजपप्रकारः॥ ॥उप
वेशनस्थानाधस्थान॥परमपुरुषमाधारशक्तिंकूर्ममंडूकंकाला



ग्निंवज्रंअनंतंवराहंपृथिवीनमेत्॥तत्रमंत्रः॥ॐआधारशक्तये
नमः॥ॐकुं कूर्मायनमः॥ॐमंमंडूकायनमः॥ॐकंकालाग्निरुद्रायन
मः॥ॐवंवज्रायनमः॥ॐअंअनंतायनमः॥ॐवंवराहायनमः॥ॐपृ
थिव्यैनमः॥कुशादिबास्यासनेपद्मादिशारीरासनोपविश्यप्राङ्मुखो
दङ्मुखोवाअग्निदीपंदुगोविप्रजलसमीपेतन्मुखःमंत्रपूर्वमुपविशे
त्॥तत्रमंत्रः॥पृथिवीतिमंत्रस्यमेरोपृष्ठऋषिः॥पृथिवीदेवता॥सुतलं
छंदः॥उपवेशनेविनियोगः॥ओंपृथिवित्वयाधृतालोकादेवीत्वंविष्णुना

थ॒ता॥ त्वं च धारय मां देवी पवित्रं कुरु चासनमिति॥ ततः नारसिंहं सुद
र्शनात्मकं अष्टदल चक्रं ध्यात्वा चक्रमुद्रया तेन चक्रेणैं द्रां दिक्षु ब
ध्नामि नमश्चक्रायस्वाहाअस्त्रायफट्॥ इति दिग्बंधः॥ इति मंत्रेणअ
ष्टदिक्षु स्थितशूलानुचोद्धृदिग्बंधनंकुर्यात्॥ ॐ अपसर्पंतुयेभूता
येभूतासुविसंस्थिताः॥ येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञयेति॥ दे
वंप्रार्थ्यकरशुध्योः प्रागूर्ध्वंवानमनंकुर्यात्॥ तत्क्रमस्तंत्रसारोस्म
त्तागुरून्पूर्वगुरूनादिमूलगुरूंस्तथा॥ देवतांवासुदेवंचविद्याभ्यासी

तुसिद्धिभाक्॥ अस्यार्थः॥ गुरुंसद्विद्योपदेष्टारंतन्मंत्रोपदेष्टारंवा
पूर्वगुरुंगुरोर्गुरुं॥ आदिगुरुं श्रीमदानंदतीर्थं॥ मूलगुरून्सप्तदेवता
स्तत्तद्देवतां॥ प्रतिपाद्यां॥ ततः वासुदेवंस्मरेत्॥ इति॥ मूलगुरव श्चोक्ता
पंचरात्रे॥ व्यासंचभारतीवाणीविधिंवायुरमानथा॥ तथानारा
यणमूलगुरूनाहुविपश्चितइति॥ एंवंचद्गादशनमस्काराःभवं
ति॥ तत्रक्रमः॥ ॐश्रीगुरुभ्योनमः॥ ॐ परमगुरुभ्योनमः॥ ॐश्री
मदानंदतीर्थभगवत्पादाचार्येभ्योनमः॥ ॐ वेदव्यासायनमः॥ ॐ

मारसेनमः॥ॐसरस्वत्यैनमः॥ॐवाय्वैनमः॥ॐब्रह्मणेनमः॥ॐल
क्ष्मैनमः॥ॐनारायणायनमः॥ॐतन्मंत्रदेवताभ्योनमः॥ततोॐश्री
वासुदेवायनमः॥ब्रह्महत्याशिरस्कंचस्वर्णस्तेभुजद्वयं॥सुरापानहृ
दयुक्तंगुरुतल्पकटिद्वयं॥तत्संयोगपदद्वंद्वमंगप्रत्यंगपातकं॥उप
पातकरोमाणंरक्तश्मश्रुविलोचनं॥खड्गचर्मधरंकृष्णंकुक्षौपापं
विचिंतयेदिति॥पापपुरुषंध्यात्वातन्नाभिदेशमानीयशोषबीजंलं
ललमध्यस्थोनीलवर्णोवायुबीजवाच्यःशंखगदाब्जचक्रायुधश्रीप्रद्यु



म्नोभगवान्मच्छरीरस्थंपापपुरुषंवायुनाशोषयेत्तुरुसुक्तावायुबीजं
नपूरयित्वावायुपूर्यतामितिषड्वारंजप्त्वाशुष्कंभावयेत्॥ततस्तंहृदय
देशमानीयाहृदयेत्रिकोणमंडलमध्यस्थोरक्तवर्णोअग्निबीजवाच्यः
शंखाब्जरिगदायुधःसंकर्षणोभगवान्मच्छरीरस्थंपापपुरुषंअग्नि
नानिर्दहतुरुसुक्ताॐरमितिवह्निबीजंद्वादशवारंजप्त्वातंदग्धंध्यात्वा
तंस्वमवामनासापुटेनरेच-प्रकारेणबहिःक्षिपेत्॥ततःशिरसिवर्तु
लमंडलमध्यस्थःश्वेतवर्णोवरुणस्थोवरुणबीजवाच्यःशंखचक्रप

भगदायुधः श्रीवासुदेवोभगवान्मच्छरीरंआपादतलमस्तकंवस्त्रे
अमृतवृष्ट्याआप्लावयेत्सुकावमितिचतुर्विंशतिवारंजपेत्॥
अथकरशुद्धिः॥मणिबंधेप्रकोष्ठेचकूर्परेहस्तसंधिषु॥तत्पृष्ठपा
र्श्वयोश्चैवकरशुद्धिरुदाहृता॥तत्रमंत्रेस्तुवंयंरंवंइतिबीजाक्षराणि
एतैरेवफडितिदिग्बंधःइतिवदेत्॥तत्तन्यासमातृकान्यासोसर्वमं
त्राणमुपकारकत्वादादौकुर्यात्॥विष्णवेषुचमंत्रेषुतत्तान्यासनंपु
रा॥ततस्तुमातृकान्यासंकुर्यादन्यत्रचान्यथेतिप्रमाणं॥अन्यत्रदेव

पूजादौप्रतिमायांमातृकान्यासंपूर्वंकृत्वापश्चात्तत्तन्यासः॥तत्रऋ
श्यादिमूलेनप्राणायामः॥ॐभूःअग्न्यात्मनेअग्निरुद्रायहृदयायनमः॥
ॐभुवःवायवात्मनेप्रद्युम्नायशिरसेस्वाहा॥ॐस्वःसूर्यात्मनेसंकर्ष
णायशिखायैवौषट्॥ॐभूर्भुवस्वःप्रजापत्यात्मनेवासुदेवायकव
चायहुं॥ॐसत्यात्मनेनारायणायअस्त्रायफट्॥इतिदिग्बंधः॥एतेषां
तत्तन्मंत्राणांअंतर्यामिऋषिःशिरसिदेवीगायत्रीछंदःमुखे॥प्रधा
नादिरूपीश्रीनारायणोदेवतेतिहृदयेन्यसेत्॥प्रधानोपवर्णनि

द्विभुजान्यपाविशेषतः॥कृतांजलिपुटान्येवंप्रधानंतंहरिंप्रति॥श्री
विष्णुप्रेर्णयाश्रीविष्णुप्रीत्यर्थंतत्तन्यासंकरिष्ये॥तत्रब्रह्मादशमूर्द्धः
मालाकारेणहृदयेध्यात्वान्यसेत्॥एवमग्नेपिन्यासोनामतत्रतत्र
ध्यानमेव॥अत्रसर्वत्रनमःशब्दस्यआत्मनश्चसंतेनतत्वाभिमानिदे
वतावाचिकेनान्वयः॥तत्रव्यक्तादिपदंतत्वाभिमानिदेवतावाचि॥
तत्तदात्मपदंतत्तद्दंतर्यामिश्रीविष्णुवाचि॥परायेतितुतस्यविशेष
णं॥अतःपरशब्देएकवचनमेवप्रयोक्तव्यं॥अभिमानिदेवतासुत



॥ॐपरायप्रतिष्ठात्मनेश्री०॥

तदनुसारेणएकवचनादिकं॥ॐपरायव्यक्त्यात्मनेश्रीलक्ष्मीना
रायणाभ्यांनमः॥ॐपरायसंविदात्मनेश्रील०॥ॐप०स्फूर्त्यात्मने
श्रील०॥ॐप०प्रभात्मनेश्रील०॥ॐ[illegible]॥ॐप०
कालात्मनेश्रील०॥ॐप०विद्यात्मनेश्रील०॥ॐप०मयात्मनेश्रील०॥
ॐप०मायात्मनेश्रील०॥ॐप०नित्यात्मनेश्रील०॥ॐप०कालात्मने
श्रील०॥ॐपरायपुरुषात्मनेश्रीलक्ष्मीनारायणाभ्यांनमश्चवायुपुरा
णेलक्ष्मीनारायणैकथितो॥अन्यत्रतुतत्रीत्यापरायपुरुषात्मनेत्र

स्नवायुभ्यांनमः इतिन्यासोपि॥ दक्षिण बाहौ॥ ॐ प० अव्यक्तात्मनेब्र
ह्मणेभारतीभ्यांनमः वामबाहौ॥ ॐ प० महदात्मनेब्रह्मस्नवायुभ्यांन
मः दक्षिणपादे॥ ॐ प० अहंकारात्मनेगरुडऋषिरुद्रेभ्योनमः वामपा
दे॥ ॐ प० मनआत्मनेस्कंदेंद्रादिभ्योनमः दक्षिणहस्तांगुष्टादिपंचां
गुलिषु॥ ॐ प० श्रोत्रात्मनेदिग्देवताभ्योनमः॥ ॐ प० त्वगात्मनेप्राण
यनमः॥ ॐ प० चक्षुरात्मनेसूर्यायनमः॥ ॐ प० जिह्वात्मनेवरुणनमः॥
ॐ प० घ्राणात्मनेअश्विभ्यांनमः वामहस्तांगुष्टादिपंचांगुलिषु॥ ॐ प०



वागात्मनेवह्नयेनमः॥ ॐ प० पाण्यात्मनेदक्षायनमः॥ ॐ प० पादात्म
नेजयंतायनमः॥ ॐ प० वायवात्मनेमित्रायनमः॥ ॐ प० वुपस्थात्मने
मनवेनमः दक्षिणपादांगुलिषु॥ ॐ प० शब्दात्मनेबृहस्पतिप्राणाभ्यां
नमः॥ ॐ प० स्पर्शात्मनेअपानायनमः॥ ॐ प० रूपात्मनेव्यानायनमः
ॐ प० रसात्मनेउदानायनमः॥ ॐ प० गंधात्मनेसमानायनमः वाम पा
दांगुलिषु॥ ॐ प० वाय्वात्मनेप्रवाहवायवेनमः॥ ॐ प० तेजात्मनेअग्न
येनमः॥ ॐ प० अबात्मनेवरुणायनमः॥ ॐ पराय पृथिव्यात्मनेशानेश्व

॥ ॐ प० आकाशात्मनेमहागणपतयेनमः॥

रधराभ्यांनमः॥ ॥इतितत्त्वन्यासः॥अथमातृकान्यासः॥ ॥यद्य
पिअकाराक्षराएगमेवमातृकलात्॥ॐॐनमइत्येवन्यासःप्राप्त॥
नमोबिंदुसमेताश्चविन्यसेदक्षरान्बुधइतिः॥तथापिशिष्टाचारात्
देवैंसहितान्यासांश्चमहाफलहेतुत्वाच्चसएवलिख्यतेतत्त्वन्यासोक्तप्र
कारेणमातृकामंत्राणांऋतंर्यामिऋषिःशिरसि॥देवीगायत्रीछंदः
मुखे॥अजादिरूपीश्रीनारायणोदेवताहृदयेन्यस्त॥ॐघ्रांस्वत्समा
त्मासश्चिदानंदैकदेहवान्॥शंखचक्रगदापद्मधरोध्येयोयमीश्वरः



लक्ष्मीधराभ्यामाश्लिष्टःस्वमूर्त्यिगुणंध्यगः॥अलवायुशिवाहीन्द्रविप्रै
रुक्तादिकैरपि॥सेव्यमानोधिकंभक्त्यानित्यनिःश्रेषशक्तिमान्॥त
दृग्यूपाश्वपंचाशल्लानमुद्राभयोघतः॥वंकीदंडीचधन्वीचतत्तघु
क्तास्तुवामतः॥इतिध्यायेत् एवंजपेपिबोध्यं पंचाशदितिअत्रए
कपंचाशदितिग्राह्यं॥मतांतरेक्षेइयस्यवर्णस्यपृथक्कात्शिरसि॥
ॐअंअजायनमःमुखे॥ॐआंआनंदायनमःदक्षिणनेत्रे॥
ॐइंइंद्रायनमःवामनेत्रे॥ॐईंईशानायनमःदक्षिणकर्णे॥ॐउंउग्र

यनमः वामकर्णे॥ ॐ ॐ ऊर्जायनमः दक्षिणनासापुटे॥ ॐ ॠं ॠतुंभरायनमः वामनासापुटे॥ ॐ ऌं ऌघायनमः दक्षिणगंडे॥ ॐ ॡं ॡत्रायनमः वामगंडे॥ ॐ लृं लृजायनमः॥ ऊर्ध्वोष्ठे॥ ॐ एं एकात्मनेनमः अधरोष्ठे॥ ॐ ऐं ऐरावतायनमः ऊर्ध्वदंतपंक्तौ॥ ॐ ओं ॐ ज्योतिषेनमः अधोदंतपंक्तौ॥ ॐ औं औरसायनमः मुखांतस्थानं ॐ अं अँतायनमः वाचि॥ ॐ अः अर्धभागायनमः दक्षिणबाहुसंधिचतुष्टये॥ ॐ कं कपिलायनमः॥ ॐ खं खपत्तयेनमः॥ ॐ गं गरुडायनमः॥ ॐ घं घर्मायनमः॥

नं राम ॥५७॥



ॐ ङं ङसारायनमः वामबाहुसंधिषु॥ ॐ चं चार्वंगायनमः॥ ॐ छं छोगम्यायनमः॥ ओं जं जनार्दनायनमः॥ ॐ झं झटितारयेनमः॥ ॐ ञं ञायमायनमः दक्षिणपादसंधिषु॥ ॐ टं टंकिनेनमः॥ ॐ ठं ठलकायनमः॥ ॐ डं डरकायनमः ॐ ढं ढरिलेनमः॥ ॐ णं णात्मनेनमः वामपादसंध्यग्रेषु॥ ॐ तं तारायनमः॥ ॐ थं थथ्यायनमः॥ ॐ दं दडिनेनमः॥ ओं धं धन्विनेनमः॥ ॐ नं नम्यायनमः दक्षिणपार्श्वे॥ ॐ पं परायनमः॥ ॐ फं फलिनेनमः वामपार्श्वे॥ ॐ बं बलिनेनमः पृष्ठे॥

ॐमंभगायनमःतुंडे॥ॐमंमनवेनमःहृदि॥ॐयंयज्ञायनमःत्वचि॥ॐ
रंरामायनमःचर्मणि॥ॐलंलक्ष्मीपतयेनमःमांसे॥ॐवंवाराह
यनमःरुधिरे॥ॐशंशांतसंविदेनमःमेदसि॥ॐषंषड्गुणायनमःम
ज्जायां॥ॐसंसारात्मनेनमःअस्थिषु॥ॐहंहंसायनमःप्राणे॥ॐ
लंलोलुकायनमःजीवे॥ॐक्षंनरसिंहायनमःइतिमातृकामंत्राणां
जपेत्येवं पठेत्॥ततःविश्वामित्रगायत्रीमंत्रस्यप्राणायामःकार्यः॥मं
त्रस्तुादशप्रणवसंयुक्तसप्तव्याहृतिशिरोयुक्तंगायत्रीगुरुनमस्का

ॐ० रास ॥५८॥

रेएकादशस्कोनेसवित्तनामकश्रीनारायणायनमःइतिवाच्यं॥
ॐतत्सवितुर्हृदयायनमः॥वरेण्यंशिरसेस्वाहा॥ॐभर्गोदेवस्यशि
खायैवौषट्॥ॐधीमहिकवचायहुं॥ओंधियोयोनोनेत्राभ्यांवौषट्॥
ॐप्रचोदयात्अस्त्रायफट्॥इतिषडंगंकृत्वा॥ध्येयःसदेसुक्तप्रका
रेणसवित्रंतर्गतश्रीनारायणंध्यात्वा॥विश्वामित्रगायत्रीजपेत्
जपकालेमौनॐकारव्याहृतिगायत्र्यथमनुसंदध्यात्॥तत्रापि
विशेषः॥तत्सवितुरित्यृचस्यतच्चक्षुरित्यस्यअग्न्यंतर्गतपरशुरामार्थक

तं पादत्रयस्य अनिरुद्धप्रद्युम्नसंकर्षणार्थकं त्रिजानीयात्॥ जपसंख्या
नु श्रीमदाचार्यैरुक्ता अर्कमंडलगं विष्णुं ध्यात्वैवं त्रिपदीं जपेत्॥ स
हस्रपरमादेवीशतमध्यशतावरा॥ आसूदर्शनाग्निष्टक्तत्स्तूप
विरोतत्रेति॥ तत्र प्रणवस्य परब्रह्म ऋषिः परमात्मादेवता देवीगा
यत्री छंदः॥ व्याहृतीनां प्रसेकं तिस्रएणं क्रमात्॥ विश्वामित्रजम
दग्निभरद्वाज ऋषयः॥ अग्निर्वायुःसूर्यस्तर्गतअनिरुद्धप्रद्युम्न
संकर्षणाः॥ देवताः गायत्र्युष्णिगनुष्टुप्छंदांसि॥ अस्यगायत्रीमं

अस्यविश्वामित्रऋषिः सवितृनामकश्रीलक्ष्मीनारायणोदेव
तागायत्रीछंदः॥ ऋष्यादिसारणानंतरं ध्यानश्लोकायुक्तप्रणा
वाद्यविरोधज्ञानपूर्वंचगायत्र्याश्चयथाशक्तिजपोतत्रिगुण
मष्टाक्षरंतेनसारोक्तप्रकारेणअक्षरन्यासध्यानंपूर्वकंजपेत्॥
तत्रजपेमहामंत्रजपक्रमस्तु॥ तारंनारायणायेतिव्याहृतीद्वा
दशाक्षरं॥ गायत्रीब्रह्मऋषिकामातृकापुरुषसूक्तंषडक्षरं
विष्णुमंत्रंतामंत्राजपेत्क्रमात्॥ उपदेशक्रमेणन्यासमंत्रांजपे

सुधीः॥तत्रायंप्रकारः॥नारायणाष्टाक्षरमंत्रस्तु॥आद्यंतप्रणवस
हितः॥ॐॐनमोनारायणायॐइति॥गुरुनमस्कारेतुश्रीनारायु
णायनमः॥मूलमंत्रेणप्राणायामः॥३द्वी॥२४॥१२॥पक्षत्रयंश्वासक्रि
क्रविषयं॥अथपंचांगन्यासः॥ॐकद्रोल्कायनमःहृदयायनमः
हृदयेॐमहोल्कायनमःशिरसेस्वाहाशिरसि॥ॐवीरोल्काय
नमःशिखायैवौषट्इतिशिखायां॥ॐशुल्कायनमःकवचायहुं
इतिकवचकरणं॥ॐसहस्रोल्कायनमःअस्त्रायफट्इतिदिग्ब



धः॥एतानिपंचविष्णुरूपनामानि॥अथाष्टांगन्यासः॥ॐॐवि
श्वायनमःशिरसि॥एवमादौसर्वत्रॐकाराःज्ञेयाः॥ॐनंतेजस
यनमःनेत्रयोः॥ॐमोंप्राज्ञायनमःनासायां॥ॐनांतुर्यायनमःवा
चि॥ॐरांआत्मनेनमःहृदि॥ॐयंअंतरात्मनेनमःनाभौ॥ॐणं
परमात्मनेनमःजान्वोः॥ॐयंज्ञानात्मनेनमःपादयोः॥ततःकद्रो
ल्कादिमंत्रैःदिराबंधनैः॥ज्येष्ठांगुलिमारभ्यांगुलिषुविन्यस्य॥ॐ
ॐविश्वायनमःइतिमंत्रैर्ज्येष्ठांगुलिंविहायाष्टांगुलिषुविन्यस्य॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

अस्यश्रीनारायणाष्टाक्षरमहामंत्रस्यजपंकरिष्ये॥इतिसंकल्प्य॥उद्य
द्भास्वदिसारभ्यमूर्तयोष्टावुपिध्येयाश्चक्रशंखवराभयः॥युक्ताः प्र
दीपवर्णश्चसर्वाभरणभूषिताः॥चक्रशंखवराभयहस्तान्येतानि
सर्वशः॥मूलरूपसवर्णं निरूप्यवर्णं शिखोच्यतेति॥नारायणं
विश्वादीन्कृत्वोल्कादीश्चध्यात्वाजप्त्वापुनःपूर्ववत्प्राणायामन्यासौ
कृत्वापुनर्ध्यानश्लोकंपठित्वासमाप्ययस्यस्मरेत्तिहरीसमर्पये
त्॥मंत्रतर्पणंतुजलैः॥श्रीकरंलिखित्वामावास्यसंपूज्यमंत्रमुच्च

राम
॥६१॥

र्यश्रीनारायणंतर्पयामीत्युक्त्वातर्पणंकुर्यात्॥१०७॥५४॥२४॥१०॥
नात्रजपदशांशेनतर्पणंतस्यपुरश्चरणविषयत्वात्॥मंत्रसंध्यानं
संधानाभावेकार्यं॥मंत्रार्थानुसंधानेतुतत्फलस्यापिप्राप्तेः॥तत्र
कारस्तुअस्मदाचार्यैःस्मृतिसंग्रहेउक्तः॥तत्रैवद्रष्टव्यः॥बृहच्छिष्टाचा
राभावात्मस्माभिःरत्नोक्तःयद्यपिब्रह्मचर्यादीनांस्वस्वंताद्विवर्णि
न्यासाःचतुर्थाध्यायेकथिताः॥तथापितत्रैवएतेषुमंत्रेषुविशिष्टएत
द्ग्रहणेनाचतुर्थाध्यायोक्तमंत्रग्रहणात्॥प्रथमाध्यायोक्तअष्टमहा

मंत्रेषुस्रष्ट्यंतादिविधानाभावात्॥ स्रष्ट्यंतादिन्यासोनकृतः॥ चतु
र्थाध्यायोक्तमंत्रेषुऋष्यादीनांवर्णन्यासाकरणंतुकामनाभावेन
ज्ञेयं॥सृष्टिन्यासोवर्णिनांचसंहृतिर्मोक्षमिच्छतां॥स्थितिन्यासोग्रह
स्थानांत्रयंकाम्यानुसारतः इतितत्रैवोक्तेः॥वर्णिनांब्रह्मचारिणां॥
काम्यानुसारतःऐश्वर्यादिकाम्यानुसारतः॥यद्यपिआचार्यैः तंत्रसारे॥ राम
अष्टाक्षरमंत्राणांसंहृतिन्यासः कथितः॥तथापितस्यसंन्यासिवि ॥६२॥
षयत्वंज्ञापयितुंऋष्टेःसृष्टिन्यासएवक्रियतेअतएववर्मस्तोत्रेपा

दयोर्जानुनोरूर्वीरिसादिनासंहारन्यासंपूर्वमुच्चार्यविपर्ययथापिवे
तिसृष्टिन्यासश्चकथितः॥यद्यप्यष्टमहामंत्रेषुप्रणवस्यपूर्वंसंबंधात्त
त्वन्यासादिकंपूर्वंवक्तव्यंतथापिजापाधिकारीयतिरस्यसूचितइ
तिमध्वविजयोक्तेः॥ऋष्याचाराद्यभावाच्चतस्यग्रहस्थाद्यजाप्यत्वात्त
प्रणवन्यासादिकमत्रकथितं॥व्यासाचार्यैस्तु॥शुद्धग्रहस्थाधिरमा
श्रितअष्टमहामंत्रपद्धतौप्रणवंन्यासध्यानादिकथितं॥ ॥इतिनार
यणमंत्रः॥अथव्याहृतिमंत्रः॥ ॥ॐभूर्भुवःस्वःभूर्भुवस्वःॐइति

मंत्रः॥नमनेएकादशस्थानेहरयेनमइतिविशेषः॥मंत्रेणप्राणायामः॥ ॐ॰
३धि॥२४॥१२॥न्यासः॥ॐनारायणायहृदयायनमःइतिहृदयेभूःव ॐ
सुदेवायशिरसेस्वाहेतिशिरसि॥ॐभुवःसंकर्षणायशिखायैवौष
ट्शिखायां॥ॐस्वःप्रद्युम्नायकवचायहुमितिकवचकरणे॥ॐभूर्भु
वस्वःअनिरुद्धायअस्त्रायफट्इतिदिग्बंधः॥ॐभूःवासुदेवायनमःशि रामा
रसि॥ॐभुवःसंकर्षणायशिखायैवौषट्॥ॐस्वःप्रद्युम्नायकवचाय ॥६३॥
हुमितिकवचकरणे॥ॐभूर्भुवःस्वःअस्त्रायफट्इतिदिग्बंधः॥ॐ

भूःवासुदेवायनमःशिरसि॥ॐभुवःसंकर्षणायनमःहृदये ॐस्वः
प्रद्युम्नायनमःनाभौ॥ॐभूर्भुवःस्वःअनिरुद्धायनमःइतिव्यापककरा
रेणहस्ताभ्यांसर्वांगंन्यस्य॥अस्यश्रीव्याहृतिमंत्रस्यब्रह्माऋषिःशि
रसि॥गायत्रीछंदःमुखे॥हरिर्देवताहृदयेन्यस्य॥उषदादिस्ववर्णश्च
तानमुद्राभयोद्यतः॥लक्ष्मीधराभ्यामाश्लिष्टश्चतुर्बाह्वादिनाहरिंध्यात्वा॥
वासुदेवादिकाशुक्लरक्तपीतासितोज्वलाः॥शंखचक्रगदाब्जेतःप्रथ
मोमुसलीहली॥सशंखचक्रस्तृतीयःशार्ङ्गीबाणवान्॥चक्रंश

खस्तुरीयस्तु चक्रंशारवासि चर्मवान्॥इति वासुदेवादि चतुरश्च ध्यात्वाज
स्राजपोपसंहारः कार्यः॥तर्पणंतु॥ॐभूः अनिरुद्धंतर्पयामि॥ॐभु
वः प्रद्युम्नंतर्पयामि॥ॐस्वः संकर्षणंतर्पयामि॥ॐभूर्भुवः स्वः वासुदे
वंतर्पयामि॥१०८॥२७॥ ॥अथ वासुदेवमंत्रः॥ ॥ॐनमोभगव
ते वासुदेवायेतिमंत्रः॥नमनेएकादशस्थानेवासुदेवायनमः इतिवि
न्यासः॥मंत्रेणप्राणायामः॥३॥२४॥१२॥न्यासः॥ॐॐअनिरुद्धाय
नमः हृदये॥ॐनमः प्रद्युम्नायशिरसेस्वाहेतिशिरसि॥ॐभगवते



संकर्षणायशिखायैवौषट् इतिशिखायां॥ॐवासुदेवायकवचाय
हुं इतिकवचकरणं॥ॐनमोभगवतेवासुदेवायनारायणायअस्त्रा
यफट् इतिदिग्बंधः॥ॐकेशवायनमः शिरसि॥ॐनारायणायन
मः चक्षुषोः॥ॐमोंमाधवायनमः नासिके॥ॐभंगोविंदायनमः वा
चि॥ॐगंविष्णवेनमः हृदि॥ॐवंमधुसूदनायनमः नाभौ॥ॐतेंत्रि
विक्रमायनमः जान्वोः॥ॐवांवामनायनमः पादयोः॥ॐसुंश्रीधराय
नमः दक्षबाहौ॥ॐदेंहृषीकेशायनमः वामबाहौ॥ॐनंपद्मनाभायनमः

दक्षिणेऽरौ॥ ॐयंदामोदरायनमःवामोरौ॥अस्यश्रीद्वादशाक्षरमंत्रस्य
अंतर्यामिऋषिःशिरसि॥जगतिछंदःमुखे॥वासुदेवोदेवताहृदये॥
अक्षवर्णैर्भयवरकरोध्येयोमितद्युतिः॥लक्ष्मीधराभ्यामाश्लिष्ट
स्यादिमंत्रदेवतांध्यात्वा॥वासुदेवादिकाशुक्लरक्तादिपूर्वोक्तपादे
वताःध्यात्वावर्णदेवताःधारयेत्॥चक्रशंखगदाब्जैतःकेशवःसूर्य
सप्रभः॥गदाब्जशंखचक्रेतोगोविंदोस्करद्युतिः॥कंजकंबुचक्रगदा
युतोविष्णुरविप्रभः॥सशंखाब्जगदाचक्रःसूर्यभोमधुसूदनः॥त्रिवि

ऋमोगदाचक्रशंखपद्मोरविप्रभः॥वामनोरिगदापद्मशंखेतोरविसु
प्रभः॥श्रीधरोरिगदाकंबुपद्मेतोर्कसमद्युतिः॥सारिपद्मोशंखगदोह
षीकेशोर्कसुप्रभः॥पद्मनाभःसाब्जचक्रंगदाशंखोर्कसन्निभः॥दामोद
रःशंखगदाचक्रपद्मार्कसप्रभः॥इत्यक्षरदेवतांध्यात्वाजलाजपोप
संहारःपूर्ववत्॥तर्पणंतुमंत्रमुक्त्वावासुदेवंतर्पयामीतिविशेषः॥४॥
॥ ॥अथब्रह्मगायत्रीमंत्रः॥ ॥चतुर्विंशतिवर्णानांजपःदशप्र
णवसप्तव्याहृतिशिरोयुक्तगायत्र्याकार्यः॥नमनेएकादस्थानेसवि

त्तनामकनारायणायनमः इतिविशेषः॥प्राणायामंकृत्वा॥ॐनारायणायहृदयायनमःहृदयेॐभूःवासुदेवायशिरसेस्वाहाशिरसि॥ॐभुवःसंकर्षणायशिखायैवोषट्शिखायां॥ॐस्वःप्रद्युम्नायकवचायहुंकवचकरणे॥ॐभूर्भुवःस्वःॐअनिरुद्धायअस्त्रायफडितिदिग्बंधः॥दक्षिणबाहुसंधिचतुष्टये॥ओंतंकेशवाय॥ॐसंनारायणाय॥ॐविंमाधवाय॥ॐतुंगोविंदायनः॥ॐवैंविष्णवे॥वामपादसंध्यग्रेषु॥ॐरेंमधुसूदनाय॥ॐत्रिंविक्रमाय॥ॐवांमनालिं



य॥ॐभंश्रीधराय॥ॐगोंहृषीकेशाय॥दक्षिणपादसंध्यग्रेषु॥ॐदेंपद्मनाभाय॥ॐवंदामोदराय॥ॐसंसंकर्षणाय॥ॐधींवासुदेवाय॥ॐमंप्रद्युम्नाय॥वामपादसंध्यग्रेच॥ॐहिंअनिरुद्धायनः॥ओंधिंपुरुषोत्तमाय॥ॐयोंअधोक्षजाय॥ॐयोंनारसिंहाय॥ॐनंअच्युताय॥ॐप्रंजनार्दनाय॥ॐचोंउपेंद्राय॥ॐदंहरये॥ॐयात्रुद्रायनमःनमो॥अस्यश्रीगायत्रीमंत्रस्यप्रजापतिऋषिःऋसिरसि॥गायत्रीछंदोत्रीदःमुखेसवितादेवताहृदयेप्रोयदादि

सवर्णश्चसूर्यमंडलमध्यगःइतिध्यात्वा॥शंखचक्रगदाब्जेतरूपादिना
केशवादिदामोदरांतंध्यात्वा॥संकर्षणादिब्रह्मांतंध्यायेत्॥तदिदं॥
शंखाब्जारिगदीसूर्यप्रभःसंकर्षणोविभुः॥शंखचक्रीपद्मगदीवा
सुदेवोरविद्युतिः॥प्रद्युम्नोरविभःशंखगदाब्जारिधरोविभुः॥अनिरु
द्धोगदाशंखचक्राब्जेतोरुधोक्षजः॥नृसिंहःसूर्यभःपद्मगदाशंख
रिसंयुतः॥सूर्यमोच्युतनामाब्जशंखचक्रगदायुधः॥जनार्दनश्चक्रशं
खगदाब्जेतोरविद्युतिः॥उपेंद्रोगदाचक्राब्जशंखयुक्॥

सारिपद्मगदाशंखोहरिःप्रोद्यद्रविप्रभः॥उपेंद्रोगदापद्म
मारिशंखभृत्॥हंसाक्षरमूर्तीः॥उपेंद्रादिनारायणंवासुदेवादिक
हंसादिनावासुदेवादिकांश्चध्यात्वा॥आद्यंतप्रणवसहितचतुर्विंशस
क्षरागायत्रीमंत्रंजपंयथाशक्तिकृत्वापूर्ववत्प्राणायामादिकंजपोपसं
हारःकार्यः॥तर्पणंतुमंत्रमुक्त्वासवित्रेनमकनारायणंतर्पयामीतिवि
शेषः॥ ॥अथमातृकामंत्रः॥ ॥अत्रनमनेस्थानेआजा
दिभ्योनमःइतिविशेषः॥प्राणायामस्तुप्रणवेनअष्टाक्षरेणसदशप्र

एवगायत्र्याकार्यः॥ॐभूरित्यादिमातृकान्यासोक्तप्रकारेणपंचांगंन्या
सादिध्यानांतंकृत्वाअजादिदेवतासहितमातृमंडलंपंकुर्यात्॥प्राण
यामोयुपसंहारस्तुपूर्ववत्॥तर्पणंतुॐअजायनमः॥अजंतर्पयामी
तिविशेषः॥ ॥अथपुरुषसूक्तमंत्रः॥ ॥नमनेएकादशस्थाने
पुरुषायनमःइतिविशेषः॥प्राणायामःप्रणवादिभिःमातृकामंत्र
वत्॥ॐभूरग्न्यात्मनेअनिरुद्धायहृदयानमःइत्यादिपंचांगंन्या
सोपितथा॥अस्यश्रीपुरुषसूक्तमंत्रस्या॥अंतर्यामिऋषिःशिरसि॥



पंचदशर्चानुष्टुभः॥अंत्यात्रिष्टुप्छंदःइतिऋग्वेदादिनांपंचादशा
नुष्टुभः॥शेषास्त्रिष्टुभइतिमुखे॥पुरुषनामकश्रीनारायणोदेवतेति
हृदयेन्यसेत्॥उपद्रष्टास्वसमाभासश्रियानंदैकदेहवान्इत्यारभ्यनि
खिलःशेषइतिमाशिरसिध्यात्वावासुदेवादिकान्ध्यात्वा॥पुरुष
सूक्तंत्रिषष्टादशर्चंजलंजपोपसंहारःपूर्ववत्॥तर्पणंतु
एकंमूलंचमुक्त्वापुरुषंतर्पयामीतिविशेषः॥पुरुषसूक्तार्थस्तुसा
मान्यतःपुरुषपदार्थः॥पूर्णषड्गुणत्वंसर्वेश्वरस्यास्किन्तत्वंतु सू

त्रार्थः विशेषार्थस्तु द्वितीयस्कंधभागवतटीकातो ज्ञातव्यः॥ ॥अथविष्णु
मंत्रः॥विष्णवेनमः इतिमनेनैवं॥अनेनैवप्राणायामः॥षडंगंन्यासः
ॐ ॐविश्वायहृदयायनमः हृदये॥ॐ षंतेजसायनमः शिरसेस्वाहाशिरः
सि॥ॐ एंप्राज्ञायशिखायैवौषट्शिखायां॥ॐ वेंतुर्यायनमः नाभौ॥ॐ
नंपरमात्मनेनमः जान्वोः॥ॐ मंअंतरात्मनेनमः पादयोः॥ॐअस्यश्रीवि
ष्णुषडक्षरमंत्रस्यॐनारायणऋषिःशिरसि॥देवीगायत्रीछंदःमुखे॥
विष्णुर्देवताहृदये॥मेघश्यामसमाभासश्चिदानंदैकदेहवानिसादि

मिसनिःशेषशक्तिमानिसंतेनविष्णुंध्यात्वा॥मूर्तेयःषट्चक्रेध्येयाः शं
खचक्रवराभयैः॥युक्ताप्रदीपवर्णैश्चसर्वाभरणभूषिताः इत्यक्षरदे
वान्ध्यात्वाजप्त्वाजपोपसंहारःपूर्ववत्कार्यः तर्पणंतुमंत्रमुक्त्वाविष्णुंत
र्पयामीतिविशेषः॥विष्णुरादार्थेतुविष्णुशब्दप्राणबलरूपत्वं॥ ॥
इत्यष्टमहामंत्राः॥ ॥अथोपमंत्रास्तुकृष्णन्यासहंसादिमंत्राः॥तत्रकृ
ष्णमंत्रः॥ॐक्लींकृष्णायनमइतिमंत्रेणप्राणायामः॥२॥षडंगंन्यासस्तु
ॐपूर्णज्ञानात्मनेहृदयायनमः॥ॐपूर्णैश्वर्यात्मनेशिरसेस्वाहा॥ॐ

पूर्णप्रभात्मनेशिरवायेवौषट्॥ॐपूर्णआनंदात्मनेकवचायहुं॥ॐपूर्णते
जोत्मनेनेत्राभ्यांवौषट्॥ॐपूर्णशक्त्यात्मनेअस्त्रायफट्॥इतिदिग्बंधः॥
अस्यश्रीरूक्ष्मषडक्षरमंत्रस्याब्रह्माऋषिःगायत्रीछंदः॥परमात्म
नेश्रीरूक्ष्मोदेवताध्यानेविनियोगः॥ॐध्यायेद्धरिन्मलिनिभंजगदे
कवंधंसौंदर्यसारमरिशंखवराभयानिदोर्भिर्दधानमजितंसरसंच
श्रीअसत्सासमेतमंसकिलप्रदमिंदिरेशं॥१॥जपप्रलयायसोपसंहा
रादिपूर्ववत्॥एवमन्येपिमंत्राः॥तंत्रसारोक्तप्रकारेणज्ञातव्याः॥



एवंमंत्रानूजल्वापुनःसंपुटाकारेणस्वस्मिन्मातृकान्यासतत्त्वन्या
सोक्त्वाप्रातःसंध्योपस्थानंकुर्यात्॥तदुक्तंश्रीमदाचार्यैः॥गायत्र्या
स्त्रिगुणंध्यायन्नष्टाक्षरंजपेत्॥प्रलम्यदेवान्विप्रांश्चगुरुंश्चहरिपार्ष
दानूइतिश्वपुस्थानप्रकारमाहायाज्ञवल्क्यः॥प्रातरुत्थानहस्ता
भ्यांसायंसंमुखहस्ततः॥मध्याह्नेतूर्ध्वबाहुभ्यामुपतिष्ठेद्दिवाकर
मितिशेषः॥प्रणम्यदेवान्विप्रस्यायमर्थः॥हरिपार्षदान्विष्णुभक्तान्देव
निसादिन्यायंविशेषलीयांतेनेवविष्णुदेवादिव्यावृत्तिःदीनत्वादे

नमानमः तन्ब्रह्मादिसनामकाः इतिगीतातात्पर्यदेवानांदेवत्व
ब्दवाच्यत्वस्यब्रह्मादिशब्दवाच्यत्वस्यचोक्तेः॥विनापुरुंविनाशि
यंब्रह्मलिंगनृभिवादयेत्॥सन्मंत्रविद्योपदेष्टाज्ञानदोगुरुस्म
नः॥पितामाताचाग्रजोपिगुरूभ्रेतानमेत्सदाश्रुतेः॥अथवैष्ण
वव्यतिरिक्तदेवादिनमस्कारंकुर्यात्इतिगातथा॥जातवेदसेग॥
ॐनमोब्रह्मलिंगायसंध्यायेनमःशब्दंनमःप्राच्यैदिशाश्रुक्राग्रा
चिदिग्देवतांइंद्राचीअग्निपत्नीस्वाहाअनुसंधेयाः॥एवंदक्षि

एस्यांदिशियमःतत्पत्नीरक्षोनिरतीस्तत्पत्नीचा॥तथापश्चिमा
यांदिशिवरुणःतत्पत्नीभागीरथीप्रवाहीचा॥ततोत्तरायांदिशिकुबे
रःतत्पत्नीमालासद्गुःपार्वतीचानुसंधेयाः॥ततऊर्ध्वायांदिशिगरुड
सोपत्नीकामःरतिश्चाअनंतरायांमधरायांदिशिशेषःवारुणीतत्प
त्नीचा॥तदनंतरंअंतरिक्षायांदिशिविनायकःतत्पत्नीविवस्वान्सूर्यः
तत्पत्नीसंज्ञाचानुसंधेयाः॥एवंसंध्यायेनमश्शब्दादावपितन्नामकदे
वतानुसंधानंजातवेदसश्शब्दादौतन्नाम्नानुसंधानंलोकनमस्कारःक

यः॥नमो ब्रह्मण्यदेवाय॥गोब्राह्मणहिताय॥जगद्धिताय॥कृष्णाय॥गोविंदाय॥नमो
यः॥नमोस्त्वनंतायसहस्रमूर्तयेसहस्रपादाक्षिशिरोरुबाहवे॥सहस्रनाम्ने
पुरुषायशाश्वतेसहस्रकोटीयुगधारिणेनमः॥प्रवरोच्चारणं कृत्वाअहंभोअभिवादयेऽमुकस
गोत्रश्चाहंभोअभिवादयेऽमुकंभवंतंगोत्रंजपोपस्थानंसायं
कालेऽपिसमंमिदंऋग्वेदिनां॥अन्यशाखिनांसंध्योपस्थानंतुतत्तत्प्र
वरानुसारेणज्ञेयं॥अनभिवाद्याःनारदीयेउक्ताः॥विप्रंस्नानंप्रकुर्व
तंसमिपुष्पकरंतथा॥वृद्धपात्रंधावंतंचैवभुंजंतंनाभिवादयेत्॥



अभ्यक्तशिरसंचैवं धावंतमशुचिंतथा॥श्रद्धावंतंतथादानंदेवतानांप्रचै
नंतथा॥यस्तंचतर्पणंचैवकुर्वंतंनाभिवादयेत्॥सभायांपथिरथ्यायां
देवतायतनेषपि॥पुण्यक्षेत्रेपुण्यतीर्थेस्वाध्यायसमयेतथा॥सभायें
वनमेदिनिवदेत्प्रसेकश्चेन्नतु॥अभिवादेकृतेयस्तुनकरोत्यभिवादनं
आशिषंवानकुरुतेसयातिनरकान्बहून्॥पादत्राणसमायुक्तःसंवेष्टि
तशिरस्तथा॥अनिवेदितयोनिश्चनकश्चिदभिवादयेत्॥एवमुपस्था
नांतेयस्यस्वस्येतिविष्णुसमर्पणंकृत्वा॥ततःप्रातरोपासनंकुर्यात्॥

औपासनकालमाह दक्षःसंध्याकर्मवत्सानेतुकुर्यादौपासनंद्विजः
नचस्मार्तेविवाहाग्नौकुर्वीतप्रत्यहंक्वित्॥कृतदारोनवैतिष्ठे
त्समप्यग्निनाविना॥तिष्ठेतेचोद्विजोवत्साःतथैवपतितोसवेत्
क्रः॥औपासनंगोमयलिप्तेकुंडस्थंडिलेवाकुर्यात्॥कुंडलक्षणमु
क्तंपरशुरामीये॥त्रिहैकमेखलंकुंडंविप्रादीनांक्रमाद्भवेत्॥प्र
थमाघ्यंगुलाप्रोक्ताद्वितीयाश्यंगुलातथा॥तृतीयामेखलाप्रो
क्ताचतुरंगुलमानतः॥कुंडवातपरिमाणंतुयोयंकुंडस्यविस्त

रोनिम्नतंतावदीरितंदृति॥कुंडमानवदत्रैकेरातस्याष्टपूर्व
कं॥रात्रेर्कपर्वमानंस्यात्सहस्राधिनपांगुलमिति॥अष्टपूर्वकमष्ट
गुलं॥अर्कपर्वद्वादशांगुलं॥नपांगुलंषोडशांगुलमित्यर्थः॥अनुया
नतुपूर्वोक्तलक्षणैर्युक्तंकुंडंतालप्रमाणंकं॥वृत्तंचनार्चनेनेवन
रस्थितंचतुर्मुखेमितिं॥तालोमणिबंधः॥मध्येत्रोमवीथीणांच
तुरस्रफलप्रदं॥सर्वेषामेवमंत्राणांवृत्तंस्यात्सर्वकामिकमिति
विष्णुः॥बहुशुद्धेधनेचाग्नौसुसमिद्धेतथैवच॥अधूमेलेलिहाने

चहोतव्यंकर्मसिद्ध्येद्योनर्विंशिजुहोत्यग्नोत्यंगारेचैवमानवः॥मंदाग्नि
रामयानर्चिदरिद्रश्चोपजायतेइतिद्रव्यंतुशुद्धंतमोदनसक्तादितंडु
लादितावत्तांव्रीह्यादित्वक्तंप्रोक्तमितिहव्यंत्रिधामतमितिशेषः
योःभावेव्रीहियवयोःहिंगोधूमंदधिवापयः॥द्विजस्तयोरभावेतुजु
हुयादुदकेनवेतिशेषः॥अरुणोदयकालेस्नानशक्तःसूर्योदयेऽोपासनंकु
र्यात्॥तत्रायंप्रकारः॥अग्नावर्चनंकृत्वाचत्वारिशृंगेसुक्प्रकारेणअ
ग्निदेवतांध्यात्वातत्रअंगारवर्णेसुक्प्रकारेणमुख्यप्राणांतर्गतपर



मेश्वरंध्यात्वाप्राणाहुतिहृदयंहुत्वाउपस्थानंकृत्वाश्रीकृष्णार्पणंकु
र्यात्॥एवंसायंकालेपिशेषःकर्तारः॥स्वयंपत्न्यपिवापुत्रःशिष्यको
वाकुमारिकः॥ऋत्विग्गुरुस्तथाभ्राताभागिनेयःसुतापतिरिति॥
दक्षः॥ततःप्रातःकालीनदेवपूजांकृत्वातथाप्रदक्षिणंनमस्कारां
श्चध्यानंकुर्यात्॥तत्रायंप्रकारः॥एकांतेशुचौदेशेजनसंमर्दवर्जि
ते॥कुशाजिनाद्यासनगःस्वस्थचित्तःस्थिरःशुचिः॥समंकायशि
रोग्रीवःधारयन्नचलंमनः॥संप्रेक्ष्यनासिकाग्रंस्वंदिशश्चानवलो

कयन्नाअष्टपत्रेह्रदयपद्ममध्येसूर्येंदुवन्हिगंपीठंतन्मध्यपद्म
स्थंनारायणमनामयंउद्यदादित्यसंकाशंतेजसानुपमंसदा॥सह
त्रेणापिसूर्याणांसज्ञानानंदरूपिणं॥अतिरिक्ततलंभास्वत्स्व
प्रांतविभूषितं॥वज्रजंघंवज्रजानुंहस्तिहस्तोरुमीश्वरं॥महाक
टीतटीनद्धकांचीपीतांबरोज्वलं॥निम्ननाभिंचक्रिबलिसंवृतो
दरबंधनं॥विस्तारवक्षसंभ्राजत्कौस्तुभावृतकंधरं॥वनमालाव



तंहारवैजयंत्यादिभिर्युतं॥पृथुदीर्घचतुर्बाहुंशंखचक्रगदांबुजै

युक्तमु नींद्रपद्माक्षंसुरत्नकरकुंडलं॥पूर्णेंदुतोद्रिक्तकांतिस
मुखपंकजं॥सुध्रुवंसललाटांतंकिरीटाबद्धमूर्धजं॥निःश्रेषदुःख
रामनंनिसानंदंशुचिस्मितं॥लक्ष्मीधराभ्यामाश्लिष्टंस्वमूर्तिगण
मध्यगं॥ब्रह्मवायुशिवाहीशविपेंद्राद्यैरुपासेव्यमानंमहा
भक्त्याध्यायेन्निसंसुरा स्तिकमिति॥गीताप्रणवकल्पैतंत्रसारो
क्तानांअयंसमुदायार्थः॥अधिकारीमुमुक्षुसम्यक्नयादोस्नाता
एकांतेकृताजिनवस्त्रकुशमृदुभूतेआसनेपद्मस्वस्तिकवीरादिका

रीरासनेउपविश्यगोचरादिकृत्वातत्तन्न्यासमातृकान्यासंकृत्वाउर
द्वयोपरिहस्तद्वयंहृदयेदृढंश्रवणमननिदिध्यासादिसंतान्त्वाग्रे
देवताप्रतिमास्थाप्यअवलोकयन्ध्यानाभ्यांसादिकंकुर्यात्॥ततोय
थाशक्तिरेचकपूरककुंभकक्रमेणवायुधारणंकुर्यात्॥तत्रहृदयेऊ
र्ध्वमुखंहृत्कमलंअष्टपत्रंप्रणवेनोर्ध्वमुखंकृत्वाप्रणवेनैवविका
स्यतत्कर्णिकायांसूर्यमंडलंतदुपरिचंद्रमंडलंतदुपरिअग्निमंड
लंध्यात्वातज्ज्वालायांरमारूपंचेत द्वीपेरमारूपेदिव्यरत्नमयमंड







लमध्येदिव्यरत्नखचितसुवर्णमयपीठंध्यात्वा॥तत्रपीठदेवतापूर
देवतायावाह्यपीठोपरिषट्कोणपद्मभूमिंध्यात्वाकोणेषुदेवस्याग्ने
तनेषु॥तद्दक्षिणेसूर्यसव्येचंद्रंअग्रेअग्निंएतान्दीपरूपान्ध्यात्वा
देवस्यसव्येश्रियंदक्षिणेभुवंपृष्ठभागेदुर्गांध्यात्वा॥तत्रषट्कोण
भूमौअष्टदलपद्मंरमारूपंध्यात्वा॥तत्रपद्मदलेषुसूर्यसूर्यकेसरे
षुसोमकर्णिकायांहृल्लेखांध्यात्वातत्रसेकंपद्माष्टदलेषुमध्ये
कर्णिकायांच॥विमलोत्कर्षिणीज्ञानाक्रियायोगात्तथैवच॥प्रह्वीस

सांतर्येत्रेणानुग्रहाचेतिन्यासःएषुक्तपरमात्मास्वरूपभूतनवत्रा
त्मिःध्यात्वाआत्मांतरात्मात्रानात्मनश्चसोपानदेवताःपरमात्म
मूर्तीःध्यात्वाकर्णिकोपरितनमःरजःसत्वमितिक्रमेणत्रिगुणा
भिमानिनीलक्ष्मीध्यात्वा॥ततःतत्प्राकारंषडाकारंकर्णिकेष
ध्यात्वातत्रस्वरूपहृदयेस्वरूपांगुष्ठपरिमितंतत्षष्ठभागेहृत्क
मलव्यापिनंप्रादेशपरिमितंतदधःकर्णिकामूलेतत्षष्ठभागेह
त्कमलव्यापिनंप्रादेशपरिमितंतदधःकर्णिकालेअंगुष्ठाग्रपरि
वायहृदयेबोधांगुष्ठपरिमितंत्र

राम
॥७७॥

माणंचपरमात्मानंनारायणंअनामयंमिसाद्यंकारेणलक्ष्मी
पराभ्यामाश्लिष्टमिसादितंत्रसारोक्तवरदेवतासहितंउपदा
दिसवर्णमेघश्यामंध्यायेत्॥अत्रविशेषःहात्रिंशल्लक्षणानिध्ये
यानि॥तथाहि॥भुजनेत्रहनुजानुनासास्कंधनेषुपंचदैर्घ्याणि॥त्व
क्नखांगुलिदंतांगुलिपर्वसुपंचसौक्ष्म्यादिपाणिपादतलद्वयंनेत्रा
तालुस्कंधनेजिह्वायामधरोष्ठनखेषुसप्तास्कंधनेषुरक्तत्वानि॥कक्षः
कुक्षिर्वक्षःघ्राणःस्कंधललाटेषुचेतिषट्सुओन्नत्यं॥ललाटकटि

वक्षःसुश्रिषुस्थानेषुपद्मानि॥तथाचोक्तंलक्ष्मीतंत्रेपंचदीर्घःपंच
सूक्ष्मःसप्तरक्तःषडुन्नतःत्रिपृथुर्लघुर्गंभीरोद्वाविंशाल्लक्षणाविद
अत्रलघुरुद्बोधःस्वार्थोक्तेयः॥तथादक्षिणकरेसहस्रारचक्रंज
ष्टस्रागदांरक्तावर्त्तशंखंच॥वामकरेसहस्रदलपद्मंचध्येयंपादत
लयोःवज्रांकुशध्वजपद्मरेखाध्येयः॥तथाचोक्तंब्रह्मद्बोधेसह
स्रारेणचक्रेणचिह्नितादक्षिणकरेगदयाष्टास्रयोचैवरक्तावव
र्त्तेनकंबुना॥वामेकरेतथाब्जेनसहस्रदलरोभितेति॥भगवतेच



सूचिंतयेद्भगवतश्चरणारविंदंवज्रांकुशध्वजसरोरुहलांछनाढ्यं
इति॥पंचरात्रेचाष्टारंखचक्रंगदापद्मैरंकितंपादपंकजमितिहृ
दयेध्येयमूर्तयः॥स्तिरुक्तः॥ब्रह्मद्बोधेहृदयेसर्वरोव्याप्तिप्रा
देरुपुरुषोत्तमः॥जीवानांस्थानमुद्दिष्टःसर्वदेवसनातनः॥तत्क
र्णिकामूलगतःसांगुष्ठप्रमाणकः॥मूलेत्रिकोणइतिनाभास्मिन्सूर्य
जीवाःप्रतिष्ठिताः॥अंगुष्ठमात्रेपुरुषकर्णिकायस्थितेहरौ॥प्रवि
शंतिसुषुप्तौचप्रबुध्यंतेततस्तथा॥सोयंत्रिरूपोभगवान्हृदया

रूपः प्रकीर्तितइति॥स्थानमायतनंप्रोक्तंप्रतिष्ठाधारकःपुमानइति
वचनात्॥स्थानप्रतिष्ठाशब्दयोरर्थभेदोज्ञातव्यः॥इदंचयावत्का
लंध्यानवशात्हृदयेवासनामयीमूर्त्तिःप्रतीयतेतावत्कालंध्याना
भ्यासंकुर्यात्॥वासनामयप्रतीत्यनंतरंतस्यप्रतिमायांवासना
याम्भोदकगंधपुष्पतुलसीअर्घ्यादिनैवेद्यतांबूलंसुवर्णपुष्पादि
कैर्नेवालंकारादिनामसांकल्पितेनपूजांकृत्वातत्प्रतिमांतर्गतवि
ष्णोपूर्णनिर्दोषःपूर्णज्ञानानंदःपूर्णस्वामीपूर्णगुणइतिध्यानंकु

र्यात्॥इदंचयावत्स्वरूपगुरुरर्त्तनंतावत्कुर्यात्॥पश्चात्तदग्रगुरुत्व
प्रकारेणयावन्मोक्षंध्यानंकुर्यात्॥अपरोक्षज्ञानानंतरंमोक्षेआ
नंदाभिव्यर्थंध्यानंकुर्यात्॥तथावायुधारणाभ्यासेसतिकर्तव्यमु
क्तंगीतादौ॥प्राणापानौसमौकृत्वेतिवांतरेभ्रुवोःकृत्वापरोक्षंयाव
त्स्यात्तावध्यायेतनिरंतरइति॥अपरोक्षंअपरोक्षज्ञानंकारयेत्॥ध्या
नसमाप्यनंतरंसंपुटाकारेणमातृकान्यासोतत्तन्यासोकृत्वाध्यानं
हरोसमर्पयेत्॥एतध्यानांगंयमनियमप्रत्याहारोपरिमितान्नादिकं

श्रीमद्भगवद्गीतादेवकुर्यात्तेयंत्रअहिंसासत्यमस्तेयंब्रह्मचर्यापरिग्रहौ
यमास्तेषांतुकथितास्त्वाध्यायोहरिपूजनंतथाशौचंतथासंतुष्टिः नि
यमाःपरिकीर्तिताःखंडास्मृतिर्धारणास्याद्खंडाध्यानमुच्यते
अप्रयत्नासमाधिश्चद्र्शनंचिरयातथाइतिध्यानंतथायथाशक्ति
श्रीमद्भगवद्गीताभाष्यभगवद्गीतादिसच्छास्त्रव्याख्यानंकृत्वापूजा
साधनपुष्पतुलसीगंधादिकंशुक्रभौमार्कवारेषुद्वादशीदर्शयो
स्तथाव्यतीपातेवैधृतौचमध्याह्नादूर्ध्वमपुत्तानास्नातस्तुलसी

॥७०॥

छिंद्यान्नगृह्णीयात्करेणचाद्यनिषिद्धदिनेसंपाद्यमध्याह्निस्नानं
कृत्वासंध्यावंदनंकृत्वामध्याह्नेतुविशेषोयंप्रदर्शतेसशुचिर्यस्य
चाऽऽकस्मेनद्वितीयार्घ्यंगायत्र्याचतृतीयकमितिप्रमाणानुसारे
णार्घ्यत्रयंदत्त्वाऽउदुत्यंजातवेदसमित्यनेनसूर्योपस्थानंजपंकृत्वा
विष्णोरमर्त्यवेदतंत्रसारोक्तप्रकारेणविष्णोर्महापूजांकुर्यात्तत्र
यंप्रकारःस्नानानंतरंप्रसाधनंपादौप्रक्षाल्यगंडूषंचतुष्टयंकृत्वा
द्विराचम्यहस्तौप्रक्षाल्यदेवद्वारदेशंगत्वादक्षिणेपादपुरःसरं

देहलीमस्त्रदेवग्रहंप्रविश्यद्वारपालान्नमेत्॥पूर्वद्वारे॥ॐश्रियैनमः॥
जयायनमः॥दक्षिणद्वारे॥ॐश्रियैनमः॥बलायनमः॥प्रबलायनमः॥प
श्चिमद्वारे॥ॐश्रियैनमः॥नंदायनमः॥सुनंदायनमः॥उत्तरद्वारे॥ॐश्रियैनमः
कुमुदायनमः॥कुमुदाक्षायनमः॥इतिद्वारपालान्नत्वा॥वंदेविष्णुंनमा
मीत्यादिविष्वादिसर्वदेवान्नत्वा॥नमोब्रह्मण्यदेवायेत्युक्त्वा॥अपरा
धसस्त्राणिक्रियंतेहर्निशंमया॥दासोहमितिमांमत्वाक्षमस्वपर
मेश्वरेत्युक्त्वा॥वायवायाहिदर्शनइत्युक्त्वाअग्निनादीपंप्रज्वाल्यवे

दिकायाअधस्तिष्ठन्देवस्याभिमुखोर्चकः॥कृतांजलिपुटोभूत्वावि
नम्रानतकंधरःकायिकान्वाचिकान्दोषान्मानसानपिसर्वदा॥विष्ण
वद्वेषहेतून्मेसमस्तान्कुरुमाधवेतिविज्ञाप्य॥आयताभ्यांविशालाभ्यां
त्रीतलाभ्यांकरपानिधे॥करुणारसपूर्णाभ्यांलोचनाभ्यांविलोक
याऽअगमार्ष्टितुदेवानांगमनार्थंतुराक्षसां॥कुरुघंटारवंतत्रदेवता
ह्वानलांछनंइतिघंटानादंकृत्वा॥घंटामंत्रस्यदेवर्षिर्मुकुलंरुद्रदेव
तं॥नादेसरस्वतीतत्रनालेनागाधिदेवतंगायत्रीछंदोविश्वेदेवाज

तीमनुष्यगंधनिर्हरणार्थेजपेविनियोगः॥एवंपित्रेरत्नमयंदीव्यद्ग्रह
तिस्निष्टुप्॥हिरण्यगर्भःसमवर्त्तताग्रेइतिपठित्वामंडपध्यानं
उत्तप्तोज्वलकांचनैरचितंतुंगांगरंगस्फुरत्स्फाटिकभित्तिभा
कांविलसितैस्तंभैश्चरैमैःशुभैः॥मुक्ताजालविलंबमंडपयुतंवै
जैश्चसोपानकैर्नानारत्नविभूषितैश्चकलैरत्यंतशोभावहैः॥ राम
द्वारैश्चामररत्नराजखचितैःशोभावहैर्मंडितंरत्नाख्यैरपिरूपय ख॥८२॥
धवलैःप्रभ्राजिकैःस्वस्तिकैः॥माणिक्योज्वलदीपदीप्तविलस

लक्ष्मीविलासास्पदंध्यायेन्मंडपमर्चनेषुसकलेष्वेवंविधःसायक
अहंतद्वेभिरितिसूक्तेननिर्माल्यंविसृज्यब्रह्मपारस्तोत्रंपठेत्॥ज
राध्यसेप्राणभृतांप्रयाणेप्राणाधिनाथेनसमीरणेन॥नारायणज
नसुखैकपूर्णस्वामिन्ममश्रीरमणप्रसीदायस्थितोमंदगेषुस्वतं हे
नोव्याप्यमीकरिणासंविधुःस्वात्मतंत्रंमांस्वेच्छयावर्त्तयत्यजः॥निष्ठु
रीदृगणुतेतिप्रार्थना॥ततःप्राणायाम्यसंकल्पश्रीविष्णुप्रेर्णय
श्रीविष्णुप्रीत्यर्थंभगवोबलेनभगवोवीर्येणभगवत्तेजसाभगव

भगवतोकर्मणाभगवतोद्रव्यैर्भगवतोश्रीवासुदेवस्याज्ञयागुरुप्र
सादेनभगवतोश्रीवासुदेवेनप्रेरितोभगवतोश्रीवासुदेवस्यषोडशो
पचारैःपूजास्थंकर्मकरिष्ये॥पूजाद्रव्याधनंद्रव्याणिदेवस्यदक्षि
णभागेऽग्न्योदकंगंधतुलस्यादीनिक्षिप्यततःभूतोच्चाटनासन
तत्वादीनिकृत्वाअष्टाक्षरेणप्राणायाम्यश्रीविष्णुपूजाधिका
रसिध्यर्थंश्रीनारायणाष्टाक्षरमंत्रंजप्त्वा१०८प्राणायामध्यान
श्लोकंपठित्वाकलशार्चनंकुर्यात्॥तत्रायंविवेकः॥संभवेस









तकलशानभिषेकस्यसिद्ध्येबहुकलशमेकंतुद्वितीयंकुंभसं
ज्ञितंनेत्रप्रोक्षणायैकंपंचपात्रप्रपूरणं॥पानीयार्घ्यचगंधा
र्थंस्वहस्तक्षालनार्थकं॥एवंवेसप्तकलशान्पंचत्रीनेकमेववा॥ज
संभवेस्वसर्वेषांभिन्नपात्राणिकारयेत्॥एवंकलशान्स्थापयि
त्वापीठपूजांकुर्यात्॥पीठमध्येपरदेवतायैश्रीलक्ष्मीनारायण
यनमःदक्षिणेऽस्त्रदेवताभ्योनमःपुनर्वामभागेसर्वगुरुभ्योन
मः॥अत्रपीठावरणपूजादेवपूजाकार्या॥मध्यभागःप्राचीज्ञे

याणितत:सव्याकारेणदेवस्याग्नेयादिअष्टदिक्ल्पनाज्ञेयाणिआग्ने
यादिविदिक्षुदेवपीठपादाधोभागेषुचतुर्षुगरुडायनमःगवेद्व्या
सायनमःदुर्गायैःसरस्वत्यैःचतुर्षुपीठपादोर्धभागेषुधर्माधि
पतयेःयमायःज्ञानाधिपतयेःवैराग्याधिपतयेःशिवायः
ऐश्वर्याधिपतयेइंद्रायःपीठस्यफलकेषुआद्यादिचतुर्दिक्षुआध
र्माधिपतयेनिर्ऋतयेःअज्ञानाधिपतयेदुर्गायैःअवैराग्याधिप
तयेकामायःअनैश्वर्याधिपतयेरुद्रायःमध्येवक्ष्यमाणाःयोगपी

उपर्यंतःएकैकस्योपरिज्ञेयाःपरमपुरुषायनमःआधारशक्तिरूपिण्यै
नमःविष्णुरूपकूर्मपुच्छाश्रितवायुरूपकूर्मायनमःवायुरूपकू
र्माश्रितअनंतनामकशेषायनमःतत्पृष्ठाश्रितपृथिव्यैक्षीरसाग
रायनमःक्षीरसारूपश्वेतद्वीपायनमःतत्रत्यसारूपायमहतेदिव्यर
त्नमंडपायनमःतन्मध्येरमारूपकंदनालसहितपद्मायःअंसूर्य
मंडलायनमःसंहृतात्मनेमंडलायःएवंसूर्यादीनांत्रीनासनेवुप
र्युपरिध्यायेत्।।तथापद्मभूमिषट्कोणेअग्नेतनदक्षिणकोणेसूर्य

यनमः॥वामकोणेसोमायनमः॥देवस्यसमुखकोणेहुताशनायन
मः॥देवस्यवामभागकोणेसत्वात्मिकाश्रियैनमः॥उमायैनमः
दक्षिणकोणेरजोभिमानिन्यैनमः॥देवस्यदक्षभागेउपवी
तरूपायैनमः॥दुर्गायैनमः॥सोपानस्थानेषुपूर्वादिदिक्षु॥ज
यैनमः॥अंतरात्मनेनमः॥परमात्मनेनमः॥ज्ञानात्मनेनमः॥क
मलासनायैनमः॥त्रिषुपूर्वादिषुदिक्षु॥विमलायनम
वृक्षर्षिणेनमः॥ज्ञानायैनमः॥क्रियायैनमः॥योगायैनमः॥प्र



यैनमः॥सत्यायनमः॥ईशानायनमः॥मध्ये॥अनुग्रहायनमः॥अग्नि
मंडलोपरितमोभिमान्यै॥नमः॥दुर्गायैनमः॥रजस्यैनमः॥धरायैन
मः॥सत्वाभिमान्यैनमः॥श्रियैनमः॥तदुपरिहरेर्योगपीठस्वरूपाय
नेश्रीमदनंतायनमः॥तदुपरिसत्वाधाकरमारूपचित्रासनायनमः
इसुक्ताचतुष्कलशमभिषेकार्थंस्थापयित्वापूजयेत्॥कलशस्यमुखे॥
भिषेकार्थसिद्धयेगंगेचेतिसर्वेसमुद्राइमंमेगंगेसुक्ता॥निर्विघ्नीका
रणार्थंतार्क्ष्यमुद्रांप्रदर्श्य॥अमृतीभवेतिधेनुमुद्रयाशंखसंरक्षणचक्र

दिग्बंधनं॥ गदामुद्रा॥ संग्रोधयेत्पद्मासु॥ तार्क्ष्यादिमुद्रालक्षणं संग्र
हेऽत्रोच्यते॥ हस्तौतु विमलौ कृत्वा ग्रथित्वा कनिष्ठके॥ मिथस्तर्जनिकेश्लि
ष्टश्लिष्टावंगुष्ठकौतथा॥१॥ मध्यमानामिकेद्वेतु दीर्घपक्षावेवकुंचये
त्॥ एषागरुडमुद्रास्याद्देवीषविषनाशनी॥ अथहस्तद्वयेत्वेवं
संमुखेचपरस्परं॥ वामांगुलीर्दक्षिणास्यचांगुलीनांचसंधिषु॥ रा
वामांगुष्ठंतुसंग्रह्यदक्षिणेनतुमुष्टिना॥ ऊर्ध्वोत्तानंतथामुष्ठीअं ॥८६॥
गुष्ठंतुप्रसारयेत्॥ वामांगुल्यास्तुश्लिष्टासंयुक्ताःसुप्रसारिताः सं

+प्रदक्षिणमध्यमाभ्यांतुतर्जन्यौद्वेप्रयोजये॥ कनिष्ठिकाभ्यांयुंजेत्साधेनुमुद्रिका॥४॥



दक्षिणंगुष्ठसंस्पृष्टामुद्रांखस्यचोदिता॥ ३॥ हस्तौतुसंरवोकृत्वा मु
सलग्नौसुप्रसारितौ॥ कनिष्ठांगुष्टकौलग्नौमुद्राचक्रस्यसिद्धिदा
॥४॥ अन्योन्याभिमुखौहस्तौकृत्वातुग्रंथिकांगुलीः॥ अंगुल्योम
ध्यमेभूयःसलग्नौसुप्रसारितौ॥ गदामुद्रेयमाख्याताप्रयासुनि
करीतथा॥५॥ करौतुसंहतौकृत्वासंहताअंगुलीस्तत्रांत
र्मिलितांगुष्ठौकुर्यादेवाजमुद्रिका॥ ६॥ इतिबलकलशएकपंचा
शन्मुद्रांकृत्वा॥ शिशुमारादियजांताःशक्तमूर्तीःआवाहयेत्॥ इति

यकलशेप्रथमेकोत्तरशतमूर्तीःआवाह्याष्टदलकलशकुंभस्थदेवे ७०
मूलमन्त्रन्यासादिअष्टाक्षरध्यानांतंकृत्वाअष्टाक्षरेणप्रथमेकंपुरुष
सूक्तेनषोडशर्चेनवामिर्वाप्रथमेकंआवाहनादिषोडशोपचारंतुलशी
समर्पणंकृत्वाकलशयोरावाहनादिपूजाकार्या॥मध्येपुरुषम
क्ष्येवाग्नेलक्ष्येवादक्षिणेधरायेवापूर्वाद्यष्टदिक्षु॥कूर्मोल्काय राम
नमः॥महोल्कायनमः॥वीरोल्कायनमः॥ज्वल्कायनमः॥सहस्रोल्का ॥८७॥
यनमःइतिद्वितीयावरणंतद्बहिःपूर्वाद्यष्टदिक्षु॥वासुदेवायनमः

मायायैनमः॥संकर्षणायनमःजयायैनमः॥प्रद्युम्नायनमःरुद्रायैनमः
अनिरुद्धायनमःशांत्यैनमःइतितृतीयावरणंतद्बहिःपूर्वाद्यष्टदि
क्षु॥केशवायनारायणायमाधवायगोविंदायविष्णवे॥
मधुसूदनायत्रिविक्रमायवामनायश्रीधरायहृषीके
शायपद्मनाभायदामोदरायसंकर्षणायवासुदेवाय॥
प्रद्युम्नायअनिरुद्धायपुरुषोत्तमायअधोक्षजायनारसिं
हायअच्युतायजनार्दनायउपेंद्रायहरयेश्रीकृष्णाय॥

४० इति चतुर्थावरणं॥ तद्बहिः पूर्वादिष्टदिक्षु॥ मत्स्याय०॥ कूर्माय०॥ वरा उ०
॥८८॥ हाय०॥ नारसिंहाय०॥ वामनाय०॥ भार्गवरामाय०॥ रामाय०॥ कृष्णा
य०॥ बुद्धाय०॥ कल्किने०॥ अनंताय०॥ विश्वरूपाय० इति पंचमाव
रणं॥ तद्बहिरष्टदिक्षु॥ अनंताय०॥ वारुण्यै०॥ ब्रह्मणे०॥ सरस्वत्यै०
वायवे०॥ भारत्यै०॥ ईशाय०॥ गिरिजायै०॥ देवस्याग्रे०॥ वीशाय०॥ तद्ब राम
मिसोपर्णाय० इति षष्ठावरणं॥ तद्बहिरष्टदिक्षु॥ सुराय०॥ इंद्राय० ॥८८॥
सांगाय०॥ सायुधाय०॥ सपरिवाराय०॥ श्रीविष्णवे०॥ तेजोधीशाय०

अग्नये० धर्माय०॥ यमाय० रक्षोभ्यो न०॥ निर्ऋतये०॥ जलाय०॥ वरु
णाय०॥ प्राणाय०॥ वायवे०॥ नक्षत्राय०॥ चंद्राय०॥ भूताय०॥ ईशान
य०॥ निर्ऋतिवरुणयोर्मध्ये शेषाय०॥ इंद्रेशानयोर्मध्ये सत्यलोकाय
नमः॥ तत्रैव ब्रह्मणे नमः इत्यावरणदेवताः अर्घ्यादि षोडशोपचारैः
संपूज्य॥ ततः कलशे कीर्ति०॥ सर्वतीर्थेन यो०॥ यस्य स्मृत्ये॥ त
तः शंख० कुंभ० देवस्य धूपदीपनैवेद्यतांबूलपुनर्धूपनीराजनांतं
मूलमंत्रेण दद्यात्॥ ततः पुष्पांजलीं दद्यात्॥ कलशप्रार्थना+ पूजं
कलशः १

छ० ॥८९॥ नराचम परि

करिष्ये॥कलशोदकेनशंखेसंपूर्यतुलशीदलंनिक्षिप्यांशंखंचंद्रा॰ खंपुरासागरो॰॥पूजयेत्॥ध्यानमावाहनंसार्घ्यंपाद्यंचमधुपर्कंक पुनर्गंधंपुष्पंचेसष्टपूजनं॥शंखंपृष्टेनतोयंचदेवोपरिनिक्षिपे त्॥शंखेसूलंचक्रमुद्रांमध्येधेनु॰अग्नेशंख॰मुखायस्वाहेतुमेलनंततः षड्ङा न्यासंप्रस्थाप्यविष्णुगायत्र्याषडङ्गान्यासंषडङ्गंसंपूर्य॥ॐनारायणाय विद्महेवासुदेवायधीमहितन्नोविष्णुःप्रचोदयात्॥अर्घ्येवायुपदे शोक्तंनेत्रंसोदकंपाद्यमेवचाईशेत्याचमनीयंस्यादाग्नेयेमधुपर्कंकं॥

अ० ॥८९॥ राम

रूत्वा ४

पुनराचमनंमध्येस्नानपात्रंतथैवचाअर्घ्येश्रियासमायुक्तंपाद्यपा त्रेसरस्वतीरतीचाचमनीयेचमधुपर्केपितामहंसंधिंचपुनराचा मेस्नानीयेवरुणंस्मरेत्॥अर्घ्येचदानमुद्रास्यात्पाद्येचांजलिमुद्रिका गोकर्णकृतिराचामेमधुपर्केचसूकरी॥पुनराचमनेस्नानेहंसमुद्रा प्रकीर्तिता॥तेषुगंधपुष्पादिकंसमर्प्यापंचामृतस्नानार्थंचपात्रा णिस्थापयेत्॥मध्येक्षीरंततोदध्यादिन्यसेत्सूर्वादिषुक्रमात्॥दुग्धेतु देवोगोविंदःदधिवामनदेवतं॥आज्यंचविष्णुदेवस्यमधौचमधुसू

दनंशार्करेचास्तेविंधाताःपंचामृतदेवताःपंचामृतदेवताभ्यःक
लशवत्पंचमुद्रांप्रदर्श्यपंचामृतदेवताभ्योगंधपुष्पतुलसीदलं
निधायमूलमंत्रेणाष्टवारमभिमंत्र्यनमस्कृत्यविष्णुगायत्र्याजप्त्वा
ततःसालिग्रामप्रतिमायामावाहनार्घ्यपूर्ववत्पीठपूजांकुर्यात्॥च
तुष्कोणंपीठस्याष्टकोणंतस्यमध्यतःकर्णिकायान्यसेत्सूर्यसो
मान्युत्तरोत्तरंतन्मध्येषट्दलंपद्मंतत्रपद्मंसमर्चयेत्॥पूर्ववत्पीठ
पूजांकृत्वापीठस्यप्रतिमायांवातेजोमयींप्रतिमांध्यात्वा॥तत्रमु

अ० रा म ॥९०॥

रव्यप्राणंध्यात्वातत्रस्वबिंबरूपंहरिमावाहयेत्॥तत्प्रकारस्तु॥वि
ष्णोरासनभूतायदिव्यरत्नमयायचाप्रधानपुरुषेशायमहापीठाय
तेनमः॥कुंडलरूपेणआसनरूपायउपबर्हणछत्ररूपायहरेर्यो
पीठस्वरूपात्मनेश्रीमदनंतायनमः॥इतिपीठदेवताःआवाह्यअर्घ्ये
पाद्यमाचमनीयंसाचमनंमधुपर्कंस्नपनंवसनंचैवगंधंपुष्पे
विभूषणं॥ईशोपचारांश्चसर्वेभ्यश्चप्रयच्छेत्॥अंगावरणदे
वेभ्योस्वाहांतैश्चस्वनामकैः॥आसनादिषुपीठस्यदेवेभ्योविष्णुना

सहा॥सुषुम्नानाडि स्थमधोमुखंहृत्कमलंवायुबीजेनोन्मुखीकरविज्ञा
नरविणाप्रकाश्यतत्कर्णिकायांस्थितंश्रीमन्नारायणंमुपगूह्यस्वदिशु
दिध्यात्वातुलसीपुष्पाणिगृहीत्वाहृदयस्थोहरेर्मूर्तिर्जीवोयस्मितिवि
वक्षायद्वैतोवर्ततेजीवःसानुजीवकलास्मृताःआत्मार्थमात्मदेवान
मितिऋचामूलेनासहापरार्थंतुसूर्यांतर्गतश्रीमन्नारायणंध्येयः
सदेसनेनध्यात्वासहस्रशीर्षेतिएहेहिममहत्सप्रस्थितश्रीपुरुषो
त्तमाआवाहयामिपीठेत्वांप्रतिमायांरमापतेऽत्रोस्वामिन्ममांतर्गत

॥ राम ॥९१॥

मुख्यप्राणांतर्गतलक्ष्मीनारायणेसुक्काआवाहनमुद्रयापीठस्थप्रति
मायांआवाहयामीतिद्विरुच्चारयेत्॥आवाहनंसं०इतिषण्मुद्राप्रदर्श्य
प्रत्येकंमूलमंत्रेणतत्तन्मुद्रयाआवाहितोभवस्थापितोभवासन्निधि
मेस्वयंव्यक्तेनावाहनविसर्जितेनाचक्रांकितेस्वयंव्यक्तेप्रतिमायांचपू
र्णकेसन्निधिमेपिसंस्थस्यध्यायेद्विनचैकतां॥मुद्रालक्षणंतु॥
हस्ताभ्यामंजलिंकृत्वानाभिकामूलपर्वणोः॥अंगुष्ठंनिक्षिपेत्तेयंमुद्रा
त्वावाहनीमता॥अधोमुखीतियंचेत्स्थापनामुद्रिकास्मृता॥वुद्धि

नांगुष्ठमुष्ठ्योश्चसंयोगात्सन्निधापिनी॥अंतः प्रविश्यितांगुष्ठौसेवस
रोधनीमतः॥हस्तौनुसंमुखांकृत्वामुष्टीकृत्वाविकुंठयेत्॥तयोर
परिचांगुष्ठौसंमुखौचपरस्परंसंश्लिष्टावुच्छ्रितौकुर्यात्सेयंसंमुख
मुद्रिका॥प्रसृतांगुलिकौहस्तौमिथःश्लिष्टावसंमुखौ॥कुर्यात्स्वहृ
दयेसेयंमुद्राप्रार्थनसंज्ञिका॥उत्तानतोकरौकृत्वाप्रसार्यहृदयेश्लि
तौ॥प्रसादमुद्राविज्ञेयासर्वदेवप्रसादिनी॥ततःसन्निध्यप्रार्थन
सान्निध्यंकुरुदेवेशसर्वसंपत्करोमम॥त्वांभक्त्यापूजयाम्यद्यभोगै



र्घ्यादिभिःक्रमात्॥विभोसकललोकेशविष्णोजिष्णोप्रभोहरे॥
यागावसानपर्यंतमत्रस्थिस्त्वंजनार्दनाभक्तस्यममपूजांत्वंगृहीत्वा
पाहिमांविष्णो॥प्रतिमायांमातृकान्यासंअष्टांगन्यासादीश्वरवत्कृत्वास
न्निधानंजपंकुर्यात्॥ततःपादुकेसमर्प्यस्नानपीठमागछेत्युक्त्वाउ
त्तिष्ठब्रह्मणस्पतेइत्युत्थाप्यामृदंकलैर्भिरितिस्नानपीठेउपविश्य
मूलमंत्रेणमृत्तिकांशोचंगंडूषान्दंतकाष्ठंमुखप्रक्षालनंचकार
यित्वादर्पणंप्रदर्श्य॥आपोहिष्ठेअर्घ्यंआपःपाद्येतिपाद्यंशोदे

वीसाचमनंगायत्र्यामधुपर्कंश्रोदेवीतिपुनराचमनीयंमूलमंत्रेण
सकलापकर्षणस्नानंआप्यायस्वेतिपयःदधिक्षीरेतिदध्याघृतंमिश्रं
क्षेतिघृतंमधुवातेतिमधुस्वादुःपवस्वेतिशर्करास्नानंकारयित्वाआपो
हिष्ठेतिशुद्धोदकस्नानंकारयित्वामहाभिषेकंकुर्यात्॥सालग्रामाः
समापूज्याःविषमानकदाचन॥एकस्तुविषमोपूज्यःसमेषुद्वित्रयं
नहि॥चक्रांकंमिथुनंपूज्यंनैकचक्रांकमर्चयेत्॥चक्रांकंमिथुनंपू
ज्यंसालग्रामंप्रतिप्रति॥आत्वाहार्षमुक्तंघर्मसमंनेतिसूक्तंविष्णु

सूक्तंचविश्वकर्मीयंपुरुषसूक्तानुवेदांतनारायणवर्मब्रह्मसूत्रा
दिमहामंत्रैश्चबृहत्कलशोदकेनाभिषेकंकृत्वा॥ततःकुंभेनाभिषेकं
कुर्यात्॥शिंशुमारादिकान्पूर्वमावाहयेत्कलशेसुधीः॥अजादिमूर्ति
भिःप्राज्ञःअभिषेकंसमाचरेत्॥ततःअभिवस्त्रेतिवस्त्रंसंपुटेप्रसा
र्यतत्रतुलसीपत्राण्यास्तीर्यसालग्रामचक्रांकितानिनिधायाज्ञने
करत्नसंयुक्तांतुलसीदलसंयुतां॥विष्णुवक्षस्थलेमालांवैजयंतीमु
दाहृतां॥मूलमंत्रेणवैजयंतीमालांसमर्पयामि॥एवंसर्वेषुपंचारेषु

मूलमंत्रोग्राह्यः।।देदीप्यमानचंद्रार्कःज्वालकोटिसमप्रभं।।विष्णुवक्ष
स्थलभाजकौस्तुभंतुसमर्पयेत्।।श्रीवत्सचूडामणियज्ञोपवीतंसि
द्धसंनंआयुधानिगंधंसमर्प्यसहस्रनामाष्टमहामंत्रैःतुलसीपुष्पा
णिसमर्पयेत्।।ततोआवर्णपूजांकृत्वाधूपंदद्यात्।।वनस्पतिरसो
दिव्योगंधाढ्येयंसदागानारायणायविघ्नंआसीद्वारंतस्यैद
रस्थंधूपंसमर्पयामि।।नारायणंसुरगुरुंगजयतिहरिरचिंसग
श्रीनारसिंहजयनारसिंहजयश्रीहरेधूपंसमंतततःआचमनी

धूपंसमर्पयामि।।साज्यंत्रिवर्त्तिसंयुंदिव्यज्योतिर्नमोस्तुतेग्राह्यएवंस्वेति
जयविठलाजयविठलश्रीलक्ष्मीनारायणाभ्यांनमःदीपंसमर्पयामि
नैवेद्यंवंवेवंवंदेवस्यदक्षिणभागेमंडलोपरिअष्टदलपद्मंलि
खित्वानैवेद्यमुपरिस्थापयतुलसीदलंचतत्रतत्रनिक्षिप्यतत्समीप
मानीयोदकंअनुयोगार्थंघृतंचनिधायएषगुदकंनैवेद्यार्थंसंनि
धायतार्क्ष्यादिमुद्राःप्रदर्श्याअष्टाक्षरेणगायत्र्याभिमंत्र्यमूले
नगायत्र्याचनैवेद्यंप्रोक्षयित्वाविपुलीकरणार्थंमेरमुद्रांप्रदर्श्य

र्थं चंद्रसूर्यप्रदर्श्यमूलमंत्रेणैकादशवारमभिमंत्र्य॥अथनिष्ठचक्रं चिकल्पितंचापरंग्रहे॥पक्वमन्नंसपानीयंसर्वोपस्करसंयुतं॥यावत्कालंमनुष्याद्यैर्भोक्ष्यमाणंसुरैरपि॥तत्सर्वंविष्णुपूजार्थंप्रियतांमेजनार्दन॥सोवर्णैस्फालिवर्यैर्मलिंगणैरचितेगोघृताक्तासु पक्वान्नक्षांभोज्यांश्चलेह्यान्सकलमहचोष्यमन्नंनिधाय॥नानारागैकरूपेतंदधिमधुसघृतंक्षीरपानीययुक्तांबूलंचापिविष्णोप्रतिदिवसमहंमानसंचिंतयामि॥ओंजंत्वामिंद्रवर्यंश्चंद्रमामन

ओं॥ततः॥श्रीनिवासनमस्तेस्तुमहानेवेद्यमुत्तमं॥संग्रहंसुरश्रेष्ठमुक्तिमुक्तिप्रदायकं॥सत्यंत्वर्तेनपरिषिंचामि॥अमृतोपस्तरणमसि स्वाहाइतिदेवस्यदक्षिणहस्तेआपोशनंलक्ष्मीहस्तेनस्वादूदकंदक्षिणपात्रांतरेक्षिपेत्॥सुधारसंसुविपुलंआपोशनमिदंतवग्रहाणकल्पितंमयाभक्तेष्टमुपभोज्यतांइति॥अमृतोपस्तरणमसि ॐप्राणात्मनेअनिरुद्धायस्वाहा॥ॐअपानात्मनेप्रद्युम्नायस्वाहा॥ॐव्यानात्मनेसंकर्षणायस्वाहा॥ॐउदानात्मनेवासुदेवायस्वाहा॥ॐ

समानात्मनेब्रह्मलोकस्वाहा॥त्वंसर्वयज्ञभोक्तात्वंसर्वोत्तर्यामित्वंसर्वं
त्वमेवजगदीशत्वंतवाधीनंत्वदाश्रया॥परिवेषयंतीश्रीमुख्यप्राणस्य
वीजयेत्॥भारत्याद्याःपरिचरंतीद्वाद्याःद्वारपालकाः॥मध्येपान
यंसमर्पदेवस्यपवित्रान्नशाकादिकंसमर्पयेत्॥शुभंपिबस्सोमि
त्यनाशुभंसहरिःपिबेत्॥पूर्णानंदमयस्यास्यचेष्टाज्ञायतेक्वचि
त्तिश्रीमद्राघ्योक्तेः॥तानिनिंद्यानिहारित्ये नोक्तानि॥भावदुष्टंक्रिया



दुष्टंजातिदुष्टंतथैवच॥संसर्गकालदुष्टंचवर्जयेद्दुष्टपंचकं॥रूपदु



क्षयाद्धातुभावदुष्टप्रकीर्तितं॥आरनालंचमद्यंचकरनिर्म
थितंदधि॥हस्तदत्तंचलवणंक्षीरंघृतजलान्वितं॥ताम्रपात्रेत
यद्व्यंक्षीरंलवणमिश्रितं॥ओदनंचपुनःपक्वंतिलापिष्टंच
सिःसटंहरितंप्रोक्तंक्रियादुष्टंजातिदुष्टमथोच्यते॥अलाबुछ
त्रवंताकंबिंबकोशांतकीफलं॥लशुनंगृंजरंशुष्कंनिष्पावा
श्वकलिंगकं॥निर्यासांश्चाविनाहिंगुंश्वेतंचबृहतीफलं॥वं
शांकुरोदुवरेचतथाश्लेष्मांतकीफलं॥उपोदकीसिःसटंचप

लांडुश्वमसूरिकाइतिश्वकाकपुंश्चलीभिश्चउदक्यासूतिकादिभिः॥ ७०
दृष्टंस्पृष्टंचदत्तंचसुरक्षेषंतथैवच॥अक्षतेनचसंयुक्तंसंसर्गदू
षितंहितत्॥चातुर्मासेषुशाकादिभोजनंहरिवासरे॥भोजनंतप
लांश्राद्धंकरणेकालदूषितमितिरूपादुष्टंमांसतुल्यंरूपयुक्तंच
द्विषफलं क्षयात्तुनाश्नीतगंधात्तुर्गंधात्॥अलाबुद्विविधमपि राम
जातिदृष्टंकंकटिकाभाषयाहालगुंबलकाईमुच्यते॥द्वितीय ॥९७॥
यंरामगुंबलकाईमुच्यते॥तेलंगुभाषयाऊनयो॥ऊनुगुंबल

काईराजगुंबलकाई॥महाराष्ट्रभाषयाभोपलाखुरासनीभो
पलाअपसव्यभाषयाकंदुखुरासनीमदनीविनोदावेघनिघंटे
लुाअंबुराजालांब्रिति॥तुंबिमिष्टामहातुंबीराजालाबुवलाबुनी
कोशातकफलंद्विविधंघृतकोशातकीक्षीररहिता॥क्षीरयुक्ता
चान्या॥यद्यपिवंशाकंअलाबुवत्तुल्यंसजेत्॥उपोदकीलतास
ज्याघृतकोशातकीतथेतिकाचिद्वाक्येविशेषोस्तिवर्त्तते॥तथा
पिवंशाकादीनांसामान्यतःग्राह्यंशाकेषुपरिगणनाभावात्॥

सामान्यतः शाकचतुष्टयंजायविछिन्नंसाज्यमितिप्रतीयते॥एवम
न्यान्यपिसाज्यानिशाकादीनिपुराणादेवुक्तानिज्ञेयानि॥स्वस्यदे
वस्यमध्येवस्त्रंधृत्वादेवस्यभोजनपर्यंतंअष्टोत्तरशतंमूलेमंत्रेण
जपेत्॥ततदनंतरंमनुयागंकुर्यात्॥ततःदेवस्यधूपदीपसमर्पण
सामेवंमूलग्रंथोक्तलक्षणेकुंडेस्थंडिलेवास्वसूत्रोक्तप्रकारेण
अग्निंप्रतिष्ठाप्यअन्वाधानाघाज्यसंस्कारांतंकृत्वावैष्णवाग्निसि
द्धिंकृत्वाऽध्याधानाघाज्यभागांतंहुत्वाउक्तप्रकारेणपीठपूजांकृ

अ०
राम
॥९८॥

त्वातत्रअग्नंतःपरशुरामंदेवमावाह्यपाद्याचमनीयोपचारंकृत्वा
देवेनसहधूपदीपोदत्वादेवायनैवेद्यंसमर्प्यनैवेद्यकालेहोमार्थंहवि
रथकृत्वनैवेद्येनसहस्थापितंपाद्येश्चमूलमंत्रेणअष्टोत्तरशतंस
कृत्वापुष्पांजलिपूर्वकंपीठावरणदेवताभ्यश्चतुरश्चतुराज्याहुतीर्हुत्वा
विष्टकृतादिप्रायश्चित्तांतंहुत्वाअमृतापिधानमसीतिउत्तराघोरा
नंदत्वानैवेद्यंविसर्जयेत्॥अथहस्तप्रक्षालनंमुखप्रक्षालनंमूलमंत्रे
णदत्वा॥चंदनंसकर्पूरंकस्तूर्यादिसमन्वितं॥करोद्वर्तनकंदेवप्रीत्

च

र्थंप्रतिगृह्यतामितिकरोद्वर्तनंसमर्पयामिविष्वक्सेनायनमःइतांत्रंदत्वात्रोषं
विष्वक्सेनाधीनंकृत्वादेवस्यवामभागेस्थापयित्वातत्स्थलंमूलमंत्रे
णप्रक्षालयेत्॥ओंश्रीदेवसिंहासनमागच्छेतिविज्ञाप्यमूलमंत्रेण
त्रिवारंतुलसींसमर्पयेत्॥पूगीफलंसकर्पूरंनागवल्लीदलैर्युक्तांक
र्पूरचूर्णसंयुक्तंतांबूलंप्रतिगृह्यतां॥नाभ्याआसीदितितांबूलंसमर्
हरण्यरूपःसमासुवर्णपुष्पंसमर्पयामितनःजयसजोखंउपुनर्धूपंसमर्
उपचारेषुमध्येमध्येहस्तंप्रक्षाल्य॥अर्चनप्रार्चनमंत्रैःगोघृतार्क

वर्त्तिभिःतिलतैलाक्तादिभिर्वादीपसंयुक्ताभिःचतुराष्टांगुलोच्छेधेअ
नादतलमस्तकेत्रिप्रभ्राम्यचदेवस्यवामभागेविसर्जयेत्॥तिनीरा
जनानिकृत्वामध्येश्रीतुलसीदीःत्रिवारंसमर्प्य॥मंत्रपुष्पंमूलमंत्रे
णाष्टवारंअभिमंत्र्यइमाःआपःशिवाःशुद्धाःशीतलाःसंतुपूरिताः
सूर्यस्यरश्मिभिरितिदेवस्यपादादिमुकुटपर्यंतएकवारनाभ्यादि
मुकुटपर्यंतद्वितीयवारं हृदयादिमुकुटपर्यंततृतीयवारंप्रादक्षिण्ये
नभ्रमयित्वापात्रांतरेस्थापयेत्॥आरोपयेत्ततोवह्निंहृत्सप्तमेमूलमंत्र

तश्चप्लाप्यदक्षिणंहस्तंमुखेनाकृष्यवायुना॥अनुयागवह्निं॥ततोरमाब्र
ह्मादिसनकादिहरिभक्तपूजा॥विष्वक्सेनपुरतोनैवेद्यन्यस्यप्रतिमां
ञ्जेत्॥वर्जेद्वाहनुमंतंक्षेषंगरुडमेवच॥विष्वक्सेनस्यगरुडब्रह्मा
दीनांविशेषतश्चमतीर्थादिकंसर्वंनैवेद्यंचसमर्पयेत्इतिपाद्मेतंत्र
रमायाःविष्वक्सेनादिहरिभक्तानांचपाठांतरेआवाह्यतीर्थादीनांपू
जनंबोध्यं॥रमाब्रह्मादयोदेवाःसनकाद्याःशुकादयाःनारायणप्र
सादोयंसर्वंगृह्णातुवैष्णवाःअहंरुद्रेभिरितिसूक्तं॥बलिहरेत्यादिपठे

अ०
॥१००॥

तत्॥स्तोत्रपाठादिपूर्वकंप्रदक्षिणनमस्कारान्कृत्वापूजासाङ्गुएया
र्थंअष्टोत्तरशतमूलमंत्रंजप्त्वादेवतन्न्यासमातृकान्यासाष्टाक्षरन्यास
पंचांगन्यासान्कृत्वाआत्मादेवानांयजेनयसमयजंत॥मंत्रेणउद्वा
स्वदितिध्यात्वा॥आवाहनादिमुद्राःन्यासेनविधायएहिस्वहृदये
पुनरावाहयामीतिपुनःस्वहृदयेस्थापयेत्॥याचेहंत्वांहृषीकेशन
मामिपुरुषोत्तमाहृदयेकुरुसंवासंश्रियासहजगत्पते॥इतिप्रार्थये
त्॥परदेवतापूजायांरव्यादिमंडलस्थेविसर्जयेत्॥नाहंकर्त्ताहरिः

कर्तो॥ नजाने कर्मयत्किंचि न्मापिलोकिकवैदिके॥ नविधेधविधिं
श्लोतवदासोस्मि केवलं॥ मंत्रतस्तंत्रतः॥ तद्रक्षि स्तत्कलं मह्यंतस्
सादपुनःपुनः॥ कर्मन्यासोहरेरेव विभोस्तत्स्थिकरंसदा॥ मादृशो
नपरःपापी ॥ रक्षतासेव विश्वासस्तदीयोहमितिं
स्मृतिः॥ स्थितिःसेवागतिर्यात्रा मतिश्चिंता स्तुतिर्वचः॥ अहोसर्वं
तत्केविष्णोसुधियासर्वदार्चनं॥ इतिसंप्रार्थ्य॥ यस्यस्मरेतिविष्णो
समर्पयेत्॥ तत्तारद्वाजसंहितायां॥ वस्त्रंतुत्रिगुणीकृत्यतत्रपाणिंनि

धायचांगुष्ठमध्येस्थितंतोयंभ्रामितंकरोपरि॥ अंगलग्नमनु
ष्यांगंब्रह्महत्यायुतंदहेत्॥ पाणेौपाणिंनिधायश्रीःतुलसीमिश्रि
तंपिबेत्॥ एकादश्यामेकवारंतीर्थंतुलसीविना॥ आदौधृतंतत्
पीत्वापुनःशिरसिधारयेत्॥ सालग्रामजलंपीत्वा कोटियज्ञफलंलभे
त्॥ तस्मात्षड्गुणंपापंप्रभोबिंदुप्रतापनात्॥ निर्माल्यंनाभिशिरसे
करेयोरपयेत्सुधीः॥ ॥ इतिदेवपूजाविधिः॥ अथवैश्वदेवविधिः
॥ ॥ तथाचपराशरः॥ अकृत्वावैश्वदेवंतुयोभुंक्तेद्विजोत्तमः॥

सुंडे हि कृमीन्सर्वान्काकयोनीषुजायते इति॥यदि स्याल्लोकिके पाक
स्तत्रैवाग्नौप्रहयते॥यत्स्याग्नौपचनेचेत्स्याधोमंतत्रैवचाचरेदिति॥
यस्मिन्नग्नौपचेदन्नंतस्मिन्होमोविधीयतेति॥जुहुयाद्वैश्वदेवंप
रिस्तरणवर्जंविनाहत्वाविष्णवेनमःपूर्वमंत्रैरष्टाक्षरादिभिः॥व्या
हृतीःवैश्वदेवंप्रकुर्वीतस्वशाखाविहितंद्विजः॥जुहुयात्सर्पिषाभ्यक्तं
लवणक्षारविवर्जितं॥दध्यक्तंपयसाभ्यक्तंतदभावेवुनापिवा॥प
योदधिघृतेवापिवैश्वदेवंसुवेणतु॥हस्तेनान्नादिनाकुर्याज्जले



रंजिलिनाजलेइति॥तच्छेषेणबलिंदद्यात्तदिदंप्लावितेनतु॥वि
नाचकोद्रवंमाषंचणकंचकुलित्थकंरतिं॥उत्तानेनतुहस्तेनसव्यंगु
लीमयुतेनचासंहतांगुलिपाणिस्तुवाग्यतोजुहुयाद्धविरिति॥य
त्किंचिज्जुहुयादग्नौतत्सर्वंयागपूर्वकं॥तस्मिन्नग्निगतंरामतत्तद्दे
वस्वनामकंअविभक्ताविभक्तावापृथक्पाकोद्विजायतः॥कुर्युःपृ
थक्पृथक्पक्तंभोजनात्प्राक्दिनेदिने॥विभक्तानांचपाकेक्वेज्ये
ष्ठेनैवसमाचरेत्॥पुत्रोभ्रातातथाशिष्यःऋत्विक्श्वशुरमातुलः॥॥

पत्नी वाश्रोत्रियो ये भ्यःश्वैश्वदेवादिकर्मणिाऽन्नीहायने कृष्यस्य
वैश्वदेवादिके कृतेासर्वस्यापि कृतंत स्यान्नपथकृवैश्वदेवक
अन्नस्यैकस्वामिकत्वे वैश्वदेवे कृते सतिाउत्तरस्याऽन्यस्यापि च
सर्वस्य कृतस्याद्वैश्वदेवकमितिापूर्वान्नस्य कृतादोषावैश्वदेवा
दिकर्मणःापिसर्वस्य कृतंस्याद्वैश्वदेव कमितिावैश्वदेवंदिवारात्रौ
त्रौकुर्याद्बलिहृतिंतथारात्रौहोमंप्रकुर्वीतनित्यंयेषुतामंत्रतोबलिं
नान्यद्बलिंहृतिंरात्रौयद्वाकुर्यादमंत्रतइतिारात्रौहोमंवैश्वदेवहो

मंयथास्थितमंत्रतःप्रकुर्वीतिाबलिहरणंतुयेषुताःप्रचरंतीतिम
त्रणेवाऽन्यद्बलिंहृतिंाऽन्यदेवमंत्रेणबलिंहरणमित्यर्थःावैश्व
देवंयदाकुर्यात्स्वान्योविप्रादिकस्तथाऽअमंसंस्कारमंत्रार्थान्नकु
र्याद्बलिकर्मचितिाम्यरोगविनाशार्थं नराकारबलिंहरेत्ताववृ
जनाकारमथवाबलिंविप्रोहरेध्रुवंाआयुरारोग्यसौभाग्यंपुत्रवि
द्यापशुस्मृतिं कामीश्रीमोक्षधर्मार्थीचक्रकारबलिंहरेत्ताचक्रा
कारमथाष्टारंकुर्यादग्निसमीपतःाबदरीफलमात्रंतुघृतक्षीरा

दिमिश्रितांऽजलिंक्षिपेद्द्विजश्रेष्ठाभूमौतद्धलिसंज्ञिकं॥पूर्वातुदिङ्मा
रण्यवैश्यान्यावधिकंस्मृतं॥दिवाभूमौबलिंदद्यात्रात्रौदद्यात्तुपा
त्रकरेतिहंतुकारमथाग्नंवाभिक्षांवापुष्कलांद्विजः॥दद्यादितिथ
येनियंतस्कंज्ञात्वाहरिंपरांत्रासमाऽंभवेद्भिक्षांपुष्कलंतुचतुर्गु
णं॥चतुर्गुणोहंतुकारस्तंतस्त्रिगुणंभवेदिति॥नैवेद्यकरलोकं
षिद्धकाष्ठान्याहाऽमेध्यगंधकाष्ठानिकंटकानिस्फुलिंगकान्॥
अनंतप्राण्युपपन्नानिसोच्छिष्टानिविवर्जयेत्॥गव्यंपुरीषस्तु



कंतुशुद्धमग्नौप्रदाहयेत्॥तुलसींविनान्यकाष्टेद्विजोप्रदीपयेत्॥व्य
जनेनधमन्यावासांतरेणमुखेनवाइति॥मात्स्येब्रह्महंससंवादे॥वि
ष्णोर्नैवेद्यरूपेणवैश्वदेवादिकंचरेत्॥इक्षुक्षंतुलयापूर्वंतत्रास्तिसं
शयोमहान्॥तदर्पितंतुनैवेद्यंकथंतंपुरुषोत्तमोग्रहीष्यसिमोम्यभि
ष्ठानेत्वदुच्छिष्टंयतःपुनःहंसःयथाग्नौसंस्कृताज्यंवैअग्नावेवहि
ष्यतेऽमदर्पितंप्रगृह्णामियद्यहोमद्विजादिषु॥अयोग्यंतुयथाहो
मेघृतसंस्कारवर्जितोऽस्तेमदर्पणंयेनयज्ञादौविफलंभवेत्॥प्र

तिमामर्पितं येन नार्पयेत्तमतिमांतरे॥अग्निविप्राधिष्ठानेषर्पयेत्तु
समात्तया॥विष्णोर्नैवेद्यशेषस्यशेषं दोषान्निघ्नते॥साग्नेःस्तद्र
हितस्यापिवैष्णवस्यविशेषतः॥श्राद्धंनैवेद्यशेषेणवैश्वदेवादिपू
र्वकं॥ ॥इतिवैश्वदेवप्रकरणं॥अथभोजनविधिः॥ ॥तदुक्त
माचार्यैः॥क्षुत्क्षेपंभगवतोभ्रातिथिपुरस्सरः॥भ्रात्याःपोष्याःपि
तृमातृशिष्यपुत्रादि॥अतिथयस्तु॥अध्वश्रांतोह्यविज्ञातःक्षु
त्पिपासायुतस्तथा॥हरिभक्तोवैश्वदेवेअकस्मादागतस्तुयः॥अ

तिथिंतंविजानीयान्नातिथिंपूर्वमागतइतिस्मृत्योज्ञेयः॥पुरस
रःशब्देनअभ्यागतोज्ञेयः॥भ्रात्यादीनांतेषांपूर्वभोजनंस्वाम्यपेक्ष
या॥हृद्गतंभ्रात्यंतर्यामिणंविष्णुंस्वस्यचहृद्गतंवास्मरन्भिक्षयेः
हारीतः॥बालवृद्धसुहृद्धूभ्रात्रादीन्नदत्तंतरान्॥भोजयेच्च
यथाशक्तियथाकालंक्षुधान्वितानितिः॥पाषंडीपतितोवापिःक्षु
धार्त्तोगृहमागतः॥नैवदद्यात्सपक्वान्नंग्रासमेकंप्रदापयेत्॥अ
दत्त्वावैश्वदेवंतुभिक्षुकोगृहमागतः॥उध्वंसवैश्वदेवार्थंभिक्षां

दद्यात्निवेदयेत्॥विश्वेदेवाकृतंदोषंश्राद्धकोक्षिप्रंव्यपोहति॥यतिद
स्तज्जलंदद्याद्वेक्षंदद्यात्सुनर्जलं॥तदन्नंमेरुणातुल्यंतज्जलंसागरो
पमं॥प्रतिमाद्यामर्पितंयत्तुनार्पयेत्प्रतिमांतरे॥अग्निविप्राद्यधि
ष्ठानेहव्यंयेद्विष्णवेतुतत्॥प्रत्यङ्मुखःप्राङ्मुखोवाजान्वोरंतःकृ
त्वा॥शुभेदारुमयेपीठेसमासीनःकुशोत्तरे॥अलाभेशुभपी
ठस्यकेवलंकुशविष्टरः॥भोजनपात्रस्याधोमंडलमाहात्रयः
आदित्यावसवोरुद्राः॥ब्रह्माचैवपितामहः॥मंडलान्युपजीवंति

ओ०
राम
॥१०६॥

स्माकुर्वीमंडलमिति॥चतुरस्त्रंत्रिकोणंचेद्वर्तुलंचार्धचंद्रकंवर्ण
नांब्राह्मणादीनांमंडलानियथाक्रमं॥स्वयंनमंडलंकुर्यात्स्वार्थम
न्येनकारयेत्॥सुवर्णादिमयंपात्रंविशुद्धंकांस्यमेवच॥चतुःषष्टि
पलंचैवकांस्यमुख्यंप्रमाणतः॥तदर्धंवाथवापादंवाततोहीनंवि
सर्जयेत्॥तदभावेतुभुंजीतशुभेमृण्मयेद्विजः॥मधुकंकुटजंब्रा
ह्मंजंबुपुष्करमुदुंबरं॥लोहापनसबिल्वंतुपालाशंफलसंततं॥श्री
पर्णंमालतिलिंगंचशुभानिभोजनानिहि॥वटार्कभिल्वपर्णेषुकुंभि

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL

तिंदुकपलीयो॥कदलीगर्भसंभूतेभुक्त्वाचांद्रायणंचरेत्॥वटार्क
स्वत्थपलेषुयतिर्भुक्त्वानदोषभाक्॥रंभापद्मपलाशेषुयोभुंक्तेद्वाद
शदिने॥सप्तजन्मार्जितंपुण्यंतस्यैवनश्यति॥माजेनंचार्च
नंचैववलिकर्मचभोजनं॥देवतीर्थनवैकुर्यात्प्रायश्चित्तोवासनेस्मृ
तः॥पादाभ्यांधरणीस्पृष्टापादेनैकेनवापुनरिति॥देवतीर्थनअ
गुल्यग्रैः॥अथपरिवेषणं॥भोक्तुरीक्षितोभक्षंवामभागेतुपाय
सं॥परितोव्यंजनादीनिमध्येन्नंपरिवेषयेत्॥हस्तदेयंतुयोदव्यं



तुदर्व्याकदाचन

व्यंदेयंतुहस्ततः॥यदियोग्रालयेन्मियात्सोग्नीयान्मूत्ररेतसी॥द
व्यंदेयंघृतंचात्रलवणंव्यंजनादिकं॥तैलपक्वमपक्वंचनौदने
परमान्नेचपात्रमासाद्यमुग्धधीः॥घृतेनपूरयेत्सात्रंतद्धृतंतद्धिरं
भवेत्॥आयसेनतुपात्रेणनकिंचित्परिवेषयेत्॥अपक्वंतैलप
क्वंचहस्तेनैवंप्रदीयते॥उदकंचैवपक्वान्नेनोदव्यंतुकदाचन॥
लवणंपायसंभक्ष्यंघृतंचव्यंजनादिकं॥हस्तदत्तंनगृह्णीतगोमां
सान्नवत्स्मृतं॥अभंदृष्ट्वाप्रणम्यादौप्रांजलिःकथयेत्ततः॥अ

स्माकंनित्यमस्त्वेतत्इतिमन्त्याद्विजोत्तमइतिब्रह्मपुराणे॥परिवेषणा
नंतरंगंधाक्षततीर्थादिभिःपूजितानामतिथ्यादीनांअन्नदानंकृत्वा
कोविष्णुरितिविष्णुंसमर्प्यस्वयंगंधाक्षतादिभिरलंकृत्वा॥तीर्थादिक
ग्रहीत्वाप्राणाग्निहोत्रंकल्पंकुर्यात्॥तत्रायंप्रकारः॥प्राणायाम्य
प्राणाग्निहोत्रंहोष्यइतिसंकल्प्याहृदयंगार्हपत्योमनोदक्षिणाग्निरा
स्यमाहवनीयइत्यनुसंधायासंकर्षणश्वप्रद्युम्नतत्रभोक्षुसंस्थि
तोभोक्तृशक्तिप्रदातारोभोक्तारोचचित्रेषतः॥नारायणांनिरुद्धेतु

राम
॥१०८॥

भोज्यवस्तुषुसंस्थितौ॥तर्पकोसर्वजीवानांतस्माद्भोज्यौनचर्वतः॥अ
वकाशप्रदोनित्यंवासुदेवोनसंस्थितः॥एवंपंचात्मकंविष्णुंयउपास्ते
सदेवहिप्रोक्ताचाप्ययकश्चैवतस्यविष्णुःप्रसीदति॥नैवेद्यशेषंतुल
सीविमिश्रितं॥द्वाविमौपुरुषौलोकेइत्यादिंमुक्त्वा॥गायत्र्यानुलसी
सहिततीर्थेनअन्नादिकंप्रोक्ष्यगायत्र्याअष्टाक्षरमंत्रेरभिमंत्र्यपरिषे
चयेत्॥दिवा॥ॐससंवर्तेनपरिषिंचामिइति॥रात्रौ॥ऋतंत्वासत्येन
परिषिंचामीतिमुक्त्वाआपोशनमाचरेत्॥प्रणवस्यवस्त्रबुध्यानुमोज

नोमयतः पिबन्नास्वर्गमुक्तो तथादिव्यवस्त्रलाभीभवेन्नरः॥इत्यनुसं
धायाऽमृतोपस्तरणमसीति मंत्रेणतुलसीसहितंसालग्रामंतो
यंपिबेत्॥मंत्रास्तेर्थाहेअमृतऽअमृततुल्यतीर्थरूपोदकंत्वांसुख्य
प्राणस्योपस्तरणंपरिधानवस्त्रंऽअसीमकसीतितंत्रविशेषः॥आ
पोऽअन्नजलंविप्रः पुनः पूरयतेकरोसराब्दंचभवेद्यस्तुश्वमूत्रेण
समंस्मृतंस्वाहांताप्रणवाद्याश्चप्राणाद्याहुतिमंत्रकाः॥प्राणा
पानादिरूपाश्चचतुर्थ्यंतानामकीर्तिताः॥अनिरुद्धादिदेवेभ्योनमः

तिचवदन्बुधः॥जिह्वेचवग्यसेदन्नंनस्रोदरानेनतत्॥हरिंध्याय
न्हिजोश्नीयात्॥पूर्वंहिमधुरंरसंलवणंस्नोतथामध्येकटुतिक्तं
दिचांततःप्राद्रवंपुरुषोश्नीयात्॥मध्येतुकठिनान्नं॥अंतेपुना
र्द्रवासीतुबलारोग्ययुतोभवेत्॥जठरंपूरयेदर्धंअन्नैर्भागजलेन
चा॥वायोःसंचारणार्थायचतुर्थमवशेषयेत्॥इतिब्रह्मांडपुराणे
दृष्ट्वाचेदापतेत्स्रस्तंचिंतयेन्मधुसूदनं॥नासनारूढपादस्तुनवे
ष्टितशिरजथा॥प्रलंपंश्चहसन्नेववहिर्जानुकरोनतत्॥नारोप्य

हस्तभुंजीतपादश्चोश्चतथाभुवि॥ नप्रसारितपादश्चनोत्संगंकृतभोजनः॥
नाश्नीयाज्जार्ययासार्कंस्त्रिभिर्वाविचक्षणः॥ नत्रयानोनातिसंगोत्त
विमुक्तशिरोरुहः॥ नान्नंप्रधानविकिरन्भुंजीतातिथिकांक्षया॥ नाति
हाहेनभुंजीतनवस्त्रोधौतनरीयवान्॥ प्रगृह्यपात्रंहस्तेनभुंजीयाद्द्विज
सत्तमः॥ यासंशेषंनचाश्नीयात्पात्रशेषंपिबेन्नतत्॥ पात्रांतरेणद्वौशेषौ
र्वापिबेन्नोयंद्विजोत्तमः॥ उध्वस्यवामहस्तेननवासांतरितस्तथा॥ न
पिबेन्नज्जलेपीत्वासुरापानीभवेद्द्विजः॥ स्थापयेज्जलपात्रंतुदक्षिणे



वामतोभुवि॥ सुरक्षमाणोघवस्त्रेणपात्रेणनजलंपिबेत्॥ प्रसक्त
लवणंशुक्तंक्षीरंचलवणान्वितं॥ दधिहस्तेनमथितंसुरयातुल्य
मुच्यते॥ नोच्छिष्टोधृतमाद्यासुरोडाश्चमाक्षिकं॥ आपूपंपा
यसंमांसीयावकंकृसरंमधु॥ कवलंयावथाश्नातितेनभुक्तंसुरा
समिति॥ अनर्पितंचयद्विप्रोयोभुंक्तेतेनएवसः॥ तस्मात्सर्वं
तुविमलंविप्रोरर्पितमेवहि॥ सपवित्रेणयोभुंक्तेसर्वयज्ञफलंलभे
त्॥ भुक्तोचतुर्द्विजस्तत्रेप्राश्येदंतनिर्मलं॥ किंचिदन्नमुपादायउ

न्तरापोऽनंचरेत्॥मुख्यप्राणस्योत्तरीयंवस्त्रंध्यात्वाजलंपिबेत्॥अ
मृतापिधानमसीत्येवंहिकुर्यात्पाणिना॥पेत्केनतुतीर्थेनभूमोदघा
न्तर्थिनां॥पीत्वौषंजलंचान्नंरोरवेतिनेत्रतः॥गंडूषद्वितयंकृत्वाक्षा
लयेच्चततःकरौ॥मदाहस्तोऽग्रोधृत्वादंतांश्चैवततेगदिना॥हस्तौपा
दौपरोपादौआजानूक्षालयेत्ततः॥कृत्वाद्वादशगंडूषान्त्रिराचम्य
विशुध्यति॥आचम्येवंद्विजश्रेष्ठोहस्तांगुष्टजलंक्षिपेत्॥दक्षिणस्य
चपादस्यसंगुष्ठेसुसमाहितः॥सर्वेषामेवयागानांमात्मयागःप्रकी

र्तितः॥योऽनेनविधिनाकुर्यात्सयातिश्रेयसःपदमिति॥आचांतोप्यशुचि
स्तावत्तावत्स्नानमनुध्यतां॥उध्यतेप्यशुचिस्तावद्यावन्नोलिप्यतेमही
भोजनानंतरंतीर्थंपीत्वासतुलसीदलं॥मूलमंत्रेणाभिमंत्र्यस्वोदरंवे
दशाखतः॥जहःशेषंनयेत्संध्यामुपासीतयथापूर्ववत्॥प्रदक्षिणनम
स्कारान्कृत्वोपासनमाचरेत्॥श्रुत्यगीतपुराणादिश्रवणंकारयेत्सुधी
रितिश्रुतेः॥सायंसंध्यामुपास्यैवहुताभ्यादिभिर्युतः॥आपोऽनक्रि
यापूर्वमग्नीयादन्वहंद्विजः॥सायमप्यतिथिः पूज्योहोमकालग

नोद्विजः॥तांबूलग्रहणप्रकारस्तु॥एकपूगंमहारोग्यंद्विपूगंनिष्फलं
मवेत्॥अतिश्रेष्ठंत्रिपूगंचअधिकंदोषवद्भवेत्॥पर्णमूलाद्भवेद्व्या
धिःपर्णेग्रासापसंभवेः॥चूर्णपर्णंहरेदायुश्शिराबुद्धिविनाशनी॥
तस्मादग्रंचमूलंचशिरांचैवद्विजोत्तमः॥चूर्णपर्णंवर्जइत्वातांबू
लंखादयेद्बुधःइति॥यामात्परतयेवाथस्वपेध्यायंजनार्दनं॥अंतरा
लेततोबुध्वास्मरेत्तंबहुरोहरिं॥द्विजःश्रयीतरात्रौहिदक्षिणाग्र
कुशिरःसदा॥प्रत्यक्शिरःप्रवासेचनकदाचिदुदक्शिरश्चेति॥अ

राम
॥११२॥

नविशेषःमहादेवगृहेमार्गेभूतवेश्मनिनस्वपेत्॥मार्गेविप्रस्यदे
वानांगुरूणांचतथागृहे॥नचापिभग्नशयनेनाशुचौनाशुचिस्त
था॥प्रचेताः॥नचदेवसमीपेतुनसंध्यायांदिवाद्विजः॥निद्रा
समयमासाद्यतांबूलंवदनात्त्यजेत्॥पुष्पालिमस्तकाच्चैवतथान्य
थादोषभाग्भवेत्॥रात्रौस्त्रीसंविशेषमाह॥मनुः॥ऋतुःस्वभा
विकःस्त्रीणांरात्रौयेषोऽशसंमताः॥तासामाद्याश्चतस्रस्तुनिंद्यै
कादशीचया॥त्रयोदशीचशेषासुप्रशस्तादशरात्रयः॥स्त्रा

ता चतुर्थदिवसेरात्रौगछेद्दिचक्षणा॥इतियुग्मासुपुत्राजायंतेक
न्यासुविषमासुचेतिमाहाभारते॥तत्रायंप्रकारः॥दर्शाद्यादिपुण्य
कालवर्जितसमदिवसेस्त्रीसंगंकुर्वीतदुरुषःअर्धरात्रापररात्रदि
वासंध्याकालवर्जितरात्रभागेपादप्रक्षालनाचमनंकृत्वावामदे
वयज्ञंकरिष्येइतिसंकल्प्य॥आत्मपत्न्याभारतीतदंतर्गतलक्ष्मीम
नुसंधायस्वस्मिन्मुख्यप्राणंतर्गतविष्णुंस्मृत्वातयोःस्वपत्नीरम
णंकर्तृत्वंचध्यात्वा॥विष्णुर्योनिंकल्पयतिसोमंत्रान्पठित्वामुखे

ग्लापयित्वास्त्रीसंगंकुर्यात्॥पश्चान्मूत्रपुरीषवन्मृत्तिकाशौचादिकं
कृत्वापादप्रक्षालनानंतरंषोडशगंडूषान्कृत्वात्रिराचम्ययस्मरये
युनेनवामदेवयज्ञेनभगवान्आत्मोत्पत्तिनिमित्तंश्रीविष्णुःप्रियतामिति
समर्पयेत्॥ऋतुकालेस्त्रीसंगानंतरंऋतोरुत्तरंतुरात्रिंत्यक्त्वास्नानं
मैथुनिनंस्मृतंतदुक्तस्नानस्यरात्रावसंभवात्॥पूर्वोक्तमंत्रस्नानं
ध्यानस्नानंकार्यं॥बृहदारण्यकोपनिषदंसब्राह्मणेतुवामदेवयज्ञा
नुसंधानेप्रकाराःउक्ताः॥तत्रचायंसंक्षेपः॥तेनेनामन्वसृजेत्॥तस्या

वेदिरुपस्थो लोमानि बर्हिः चर्माधिषवणेसमिद्धोमध्यतस्तोमुष्कौ धिष
वणेसमयवान्हवै वाजिपेयेनयजमानलोकोभवति॥तावानस्य
लोकोभवतियएवंविद्वानधोपहासंचरत्वासास्त्रीणासुकृतंवृङ्क्ते
इदमविद्वानधोपसंचरत्यस्याःस्त्रियःसुकृतंवृङ्क्ते इति॥अस्यार्थः
रघूत्तमस्वामिभिः कृतः॥कामतःप्राप्तस्यापिमिथुनीभावस्यय
त्तत्वभावनयावाजिपेयतत्फलप्राप्तिरितिभावेनाऽत्रापिवेधादि
कमाह॥तेनैनामिति॥तेनमहाफलस्यविधानत्वेन॥तेनयज्ञा



संधानेन॥तेनरेतसा॥एनांस्वास्त्रियं॥अन्वासृजत्॥संयोजयेत्॥
आयतनोपिपुरुषः॥इतिशेषः॥तस्याःस्त्रियःउपस्थोवेदिः॥लोमा
नितद्वतीनिबर्हिः॥तद्वतिचर्मैवचर्म॥कृष्णाजिनस्थानीयं॥योमध्य
तो॥मध्येदेशेविद्यमानोमुष्कौ॥वृषणौतौ॥अधिषवणेसामाधि
षवणफलहेतुकाकाविसर्थः॥मध्येतःयोनिमध्यदेशेसमिधःदीप्तो
ग्निः॥तस्मिन्नग्नौ॥रेतोजुहुयात्इतिभावः॥उक्तप्रकारेणमिथुनी
भावस्ययज्ञभावेनकर्तुफलमाह॥सइति॥वाजिपेयेनयजमानस्य

उक्तप्रकारेणमिथुनीभावोपसंकल्पस्यभवति॥वाजिपेयेनयज
मानस्यपरलोकेयावत्सुरेवंभवतितावत्सुरतमनेनापिभवतीति
भावः॥फलांतरमाह॥यएवेतिवायः पुरुषः एवंउक्तप्रकारेणमिथु
नीभावस्ययत्नंविद्वान्॥अधोपहासंस्त्रीसंचरति॥आसांस्त्रीणां
सुकृतंवृङ्क्तेछेदयति॥स्त्रीभिः कृतंसुकृतंस्वयमादायतासांयथा
सुकृतंनास्तितथाकरोतीत्यर्थः॥अन्यथानर्थमाह॥अथेति॥अथपु
नर्यः पुरुषः॥इदंमिथुनीभावस्यायत्नंअविद्वान्॥अधोपहासंच

रति॥अस्यपुरुषस्यस्त्रियःसुकृतंवृङ्क्तेप्रापयंतीत्यर्थः॥इतिरेतऋष्यं॥
स्त्रीषुयल्लोहितंलोकंतत्राग्निस्तेजनार्दनः॥स्त्रीरूपःसोग्निनानेन
वज्वलज्वालसमप्रभः॥तस्माद्विष्णोःसन्निधानात्तद्भर्तृभार्यस्त्रीरे
रमात्॥नविश्लेत्सेतेरक्षात्तथापुंरेतसिस्थितः॥आदित्यसंस्थितो
विष्णुःआदिरादित्यनामकः॥तस्मान्नरेतसोभार्याविश्लेत्पतिसंस्थि
तात्॥पुरुषोभगवान्विष्णुरेतसिस्थोघुमप्रभुः॥इतिछंदोग्ये॥उप
संत्रयतेसंहिकारः॥ज्ञापयतेसप्रस्तावः॥स्त्रियासहरेतसउद्गीथः

प्रतिस्त्रीसहसेतेसप्रतीहारः॥कालगच्छति॥तन्निधानंपारंगच्छतितन्नि
धानं॥एतद्धामदेवदेव्यमिथुनेप्रोतमितितद्ध्येयं॥मिथुनस्थंपं
चरूपंध्यात्वैवपुरुषोत्तमं॥अस्यागीचस्वभार्यैगमुच्यतेनात्रसं
शयः॥इति॥योनिकूर्मिवासुदेवात्रूपंसंकर्षणोनिधात्॥आसेक
कर्मप्रद्युम्नात्अनिरुद्धाच्चधारणंइत्येवंश्लोकः॥विष्णुर्योनिंकल्पय
त्वित्यस्यव्याख्यानरूपः॥इतःपूर्वश्लोकस्तुहिंकारादिवाच्यअनिरु
द्धादिप्रतिपादकइत्यनुसंधानं॥स्त्रीसंगकालेकृतंचेत्यस्यफल



भवति॥ ॥इतिस्त्रीसंगप्रकरणं॥अत्रकश्चिद्दोषः॥आचार्यैरु
क्तः॥एषनित्यःसदाचारोगृहीलोवनिनस्तथा॥वैश्वदेवंबलिंदत्त्वा
वनंचाप्यतेवयोःसमिद्धोमोबटोस्तस्यात्स्मृत्वाविष्णुंहुताशनेइति॥
गृहिणःगृहस्थस्यवनिनोवानप्रस्थस्यबलिं॥बलिंहरणंसायंप्रा
तःभिक्षाशनंगुरुकुलवासाद्यन्येपिविशेषाःस्मृतिपुराणादौउक्ताः
ज्ञेयाः॥एवंप्रतिदिनंक्रियमाणंकर्मविष्णोसमर्पयेत्॥तदुक्तमाचा
र्यैः॥कायेनवाचामनसेंद्रियैर्वाबुध्यात्मनावानुस्मृतःस्वभावात्॥करो

छ० ॥११७॥ मियच्चसकलंपरस्मैनारायणायेतिसमर्पयामि॥इष्टंदत्तंकृतंजप्तंपू उ०
र्तंयच्चासत्प्रियं॥दारासुताश्रियाश्राणम्परस्मैसम्पिवेदयेत्इति
सर्वस्मिन्पिकर्मणिहरिस्मरणेकृतेपूर्तिर्नान्यथा॥मंत्रतस्तंत्रत
श्छिद्रंदेशकालार्हवस्तुतः॥सर्वंकरोतुनिछिद्रंमनुसंकीर्तनंतव
स्मर्तव्यःसततंविष्णुविस्मर्तव्योनजातुचित्॥सर्वेविधिनिषेधास्युः राम
रेतयोरेवकिंकराः॥ ॥इतिश्रीमदाचार्योक्तेश्च॥ ॥छल्लारीनर ॥११७॥
सिंहेनकृतेस्मस्वर्थसारगे॥स्यादान्हिकतरंगोयंश्रीमध्वपति

छ० ॥११८॥ तुष्टिदः॥ ॥इतिश्रीआन्हिकतरंगःसमाप्तः॥ ॥श्रीकृष्णार्प उ०
णमस्तु॥ ॥ ॥ 

LIBRARY
OF THE
BOMBAY
BRANCH
OF THE
ROYAL ASIATIC SOCIETY